SRIMANMAHABHARATAM

A NEW EDITION

MAINLY BASED ON

THE SOUTH INDIAN TEXTS,

With footnotes and Readings.

SAUPTIKAPARVA X.

EDITED BY

T. R. KRISHNACHARYA & T. R. VYASACHARYA,

Proprietors, Madhva Vilas Book Depot, Kumbakonam.

PRINTED AT THE

Javaji Dadaji's "Nirnaya-sagar" Press.

BOMBAY.

1907.

(Registered according to the Act XXV of 1867.)

॥ श्रीः ॥

श्रीमन्महाभारतम् ।

सटिप्पणम् ।

सौप्तिकपर्व १०.

एतच्च

कुम्भघोणस्थेन श्रीमन्मध्वविलासपुस्तकालयाधिपतिना

टी. आर्. कृष्णाचार्येण टी. आर्. व्यासाचार्येण च


अनेकेषां विदुषां साहाय्येन दाक्षिणात्यबहुकोशानुसारेण

संशोध्य

मुंबापुर्यां

जावजी दादाजी इत्येतेषां निर्णयसागरमुद्रणयन्त्रे मुद्रयित्वा प्रकाशितम् ।

शाके १८२९ प्लवंगनामसंवत्सरे ।


सौप्तिकपर्व
शिबिर.
वटवृक्ष.
अश्वत्थामा.
कृपाचार्य
कृतवर्मा

श्रीः ।

श्रीमन्महाभारतम् ।

सौप्तिकपर्व १० ।

प्रथमोऽध्यायः ॥ १ ॥

सञ्जयधृतराष्ट्रयोः संलापः ॥ १ ॥ द्रौणिकृपकृतवर्मभिर्वनमध्यमेत्य न्यग्रोधस्याधस्तादुपवेशनम् ॥ २ ॥ तत्र रात्रौ घूकेन बहुकाकवधदर्शिना द्रौणिना तद्वत्स्वेनापि पाण्डववधनिर्धारणम् ॥ ३ ॥ ततः कृपकृतवर्माणौ समुद्बोध्य स्वकर्तव्यकथनप्रार्थना ॥ ४ ॥

श्रीवेदव्यासाय नमः ।

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ १

सञ्जय उवाच ।

ततस्ते सहिताः सर्वे प्रयाता दक्षिणामुखाः ।
उपास्तमयवेलायां शिबिराभ्याशमागताः ॥ १
विमुच्य वाहांस्त्वरिता भीताः समनुबोधनात् ।
गहनं देशमासाद्य प्रच्छन्ना न्यविशन्त ते ॥ २
सेनानिवेशमभितो नातिदूरमवस्थिताः ।
[निकृत्ता निशितैः शस्त्रैः समन्तात्क्षतविक्षताः।]
दीर्घमुष्णं च निःश्वस्य पाण्डवानन्वचिन्तयन् ॥ ३
श्रुत्वा च निनदं घोरं पाण्डवानां जयैषिणाम् ।
अनुसारभयाद्भीताः प्राङ्मुखाः प्राद्रवन्पुनः ॥ ४
ते मुहूर्तात्ततो गत्वा श्रान्तवाहा पिपासिताः ।
नामृष्यन्त महेष्वासाः क्रोधामर्षवशंगताः ॥ ५
राज्ञो वधेन संतप्ता मुहूर्तं समवस्थिताः ॥ ६

धृतराष्ट्र उवाच ।

अश्रद्धेयमिदं कर्म कृतं भीमेन सञ्जय ।
यत्स नागायुतप्राणः पुत्रो मम निपातितः ॥ ७
अवध्यः सर्वभूतानां वज्रसंहननो युवा ।
पाण्डवैः समरे पुत्रो निहतो मम सञ्जय ॥ ८
न दिष्टमभ्यतिक्रान्तुं शक्यं गावल्गणे नरैः ।
यत्समेत्य रणे पार्थैः पुत्रो मम निपातितः ॥ ९
अद्रिसारमयं नूनं हृदयं मम सञ्जय ।
हतं पुत्रशतं श्रुत्वा यन्न दीर्णं सहस्रधा ॥ १०
कथं हि वृद्धमिथुनं हतपुत्रं भविष्यति ।
न ह्यहं पाण्डुपुत्रस्य विषये वस्तुमुत्सहे ॥ ११
कथं राज्ञः पिता भूत्वा स्वयं राजा च सञ्जय ।
प्रेष्यभूतः प्रवर्तेयं पाण्डवेयस्य शासनात् ॥ १२
प्रभुज्य पृथिवीं सर्वां स्थिता मूर्धनि सञ्जय ।
कथमद्य भविष्यामि प्रेष्यभूतो दुरन्तकृत् ॥ १३
कथं भीमस्य वाक्यानि श्रोतुं शक्ष्यामि सञ्जय।
येन पुत्रशतं पूर्णमेकेन निहतं मम ॥ १४
कृतं सत्यं वचस्तस्य विदुरस्य महात्मनः ।
अकुर्वता वचस्तस्य मम पुत्रेण सञ्जय ॥ १५
अधर्मेण हते तात पुत्रे दुर्योधने मम ।
कृतवर्मा कृपो द्रौणिः किमकुर्वत सञ्जय ॥ १६

ततः दुर्योधनेन सैनापत्येऽश्वत्थाम्नोऽभिषेकानन्तरं ते अश्वत्थामकृपाचार्यकृतवर्माणः ॥ १ ॥ शिबिरनिकटस्थं देशं आसाद्य वाहान्विमुच्य न्यविशन्तेति योजना ॥ २ ॥ अनुसारः पृष्ठगमनम् । प्राद्रवन्निति पुनर्वाहान्योजयित्वेति गम्यते ॥ ४ ॥ राज्ञो दुर्योधनस्य ॥ ६ ॥

सञ्जय उवाच ।
गत्वा तु तावका राजन्नातिदूरं मनस्विनः ।
अपश्यन्त वनं घोरं नानाद्रुमलतावृतम् ॥ १७
ते मुहूर्तं तु विश्रम्य लब्धतोयैर्हयोत्तमैः ।
सूर्यास्तमयवेलायां कौरवेयस्य शासनात् ॥ १८
नानामृगगणैर्जुष्टं नानापक्षिभिराकुलम् ।
नानाद्रुमलताच्छन्नं नानाव्यालनिषेवितम् ॥ १९
नानातोयसमाकीर्णैस्तटाकैरुपशोभितम् ।
पद्मिनीशतसंछन्नं नीलोत्पलसमायुतम् ॥ २०
प्रविश्य तद्वनं घोरं वीक्षमाणाः समन्ततः ।
शाखासहस्रसंछन्नं न्यग्रोधं ददृशुस्ततः ॥ २१
उपेत्य तु तदा राजन्न्यग्रोधं ते महारथाः ।
ददृशुर्द्विपदां श्रेष्ठाः श्रेष्ठं तं वै वनस्पतिम् ॥ २२
तेऽवतीर्य रथेभ्यश्च विप्रमुच्य च वाजिनः ।
उपस्पृश्य यथान्यायं सन्ध्यामन्वासत प्रभो ॥२३
ततोऽस्तं पर्वतश्रेष्ठमनुप्राप्ते दिवाकरे ।
सर्वस्य जगतो धात्री शर्वरी प्रत्यपद्यत ॥ २४
ग्रहनक्षत्रताराभिः प्रकीर्णाभिरलंकृतम् ।
नभोंऽशुकमिवाभाति प्रेक्षणीयं समन्ततः ॥ २५
इच्छया ते प्रवल्गन्ति ये सत्वा रात्रिचारिणः ।
दिवाचराश्च ये सत्वास्ते निद्रावशमागताः ॥ २६
रात्रिंचराणां सत्वानां निनादोऽभूत्सुदारुणः ।
क्रव्यादाश्च प्रमुदिता घोरा प्राप्ता च शर्वरी ॥२७
तस्मिन्रात्रिमुखे घोरे दुःखशोकसमन्विताः ।
कृतवर्मा कृपो द्रौणिरुपोपविविशुः समम् ॥ २८
उपोपविष्टाः शोचन्तो न्यग्रोधस्य समीपतः ।
तमेवार्थमतिक्रान्तं कुरुपाण्डवयोः क्षयम् ॥ २९
निद्रया च परीताङ्गा निषेदुर्धरणीतले ।
श्रमेण सुदृढं युक्ता विक्षता विविधैः शरैः ॥ ३०
ततो निद्रावशं प्राप्तौ कृपभोजौ महाबलौ ।
सुखोचितावदुःखार्हौ निषण्णौ धरणीतले ॥ ३१
तौ तु सुप्तौ महाराज तस्मिन्देशे महारथौ ।
[महार्हशयनोपेतौ भूमावेव ह्यनाथवत् ॥] ३२
क्रोधामर्षवशं प्राप्तो द्रोणपुत्रस्तु भारत ।
न वै स स जगामाथ निद्रां सर्प इव श्वसन् ॥३३
न लेभे स तु निद्रां वै दह्यमानोऽतिमन्युना ।
वीक्षांचक्रे महाबाहुस्तद्वनं घोरदर्शनम् ॥ ३४
वीक्षमाणो वनोद्देशं नानासत्वैर्निषेवितम् ।
अपश्यत महाबाहुर्न्यग्रोधं वायसावृतम् ॥ ३५
तत्र काकसहस्राणि तां निशां पर्यणामयन् ।
सुखं स्वपन्तः कौरव्य पृथक्पृथगुपाश्रयाः ॥ ३६
सुप्तेषु तेषु काकेषु विस्रब्धेषु समन्ततः ।
सोऽपश्यत्सहसा यान्तमुलूकं घोरदर्शनम् ॥ ३७
महास्वनं महाकायं हर्यक्षं बभ्रुपिङ्गलम् ।
सुतीक्ष्णघोणानखरं सुपर्णमिव वेगितम् ॥ ३८
सोऽथ शब्दं मृदुं कृत्वा लीयमान इवाण्डजः ।
न्यग्रोधस्य ततः शाखां पातयामास भारत ॥३९
संनिपत्य तु शाखायां न्यग्रोधस्य विहंगमः ।
सुप्ताञ्जघान विस्रब्धान्वायसान्वायसान्तकः ॥४०
केषांचिदच्छिनत्पक्षाञ्शिरांसि च चकर्त ह ।
चरणांश्चैव केषांचिद्बभञ्ज चरणायुधः ॥ ४१
क्षणेनाघ्नत्स बलवान्येऽस्य दृष्टिपथे स्थिताः ॥४२
तेषां शरीरावयवैः शरीरैश्च विशांपते ।
न्यग्रोधमण्डलं सर्वं संछन्नं पर्वतोपमम् ॥ ४३
तांस्तु हत्वा ततः काकान्कौशिको मुदितोऽभवत् ।
प्रतिकृत्य यथाकामं शत्रूणां शत्रुसूदनः ॥ ४४
तद्दृष्ट्वा तादृशं कर्म कौशिकेन कृतं निशि ।
तद्भावे कृतसंकल्पो द्रौणिरेकोऽन्वचिन्तयत् ॥४५
उपदेशः कृतोऽनेन पक्षिणा मम संयुगे ।
शत्रूणां क्षपणं युक्तं प्राप्तः कालश्च मे मतः ॥ ४६
नाद्य शक्यं मया हन्तुं पाण्डवा जितकाशिनः ।
बलवन्तः कृतोत्साहा लब्धलक्षाः प्रहारिणः ॥ ४७
राज्ञः सकाशे तेषां च प्रतिज्ञातो वधो मया ।
पतङ्गाग्निसमां वृत्तिमास्थायात्मविनाशिनीम् ॥४८
न्यायतो युध्यमानस्य प्राणत्यागो न संशयः ।
छद्मना तु भवेत्सिद्धिः शत्रूणां च क्षयो महान् ॥४९

नानापुष्पोपशोभितमिति झ. पाठः ॥ २० ॥ अन्वासत उपासितवन्तः ॥ २३ ॥ अंशुकं वस्त्रम् ॥ २५ ॥ शयनोपेतौ प्रागिति शेषः ॥३२॥ पर्यणामयन् परिणीतवन्त आसन् ॥३६॥ हर्यक्षं हरिन्मणिनिभलोचनम् । घोणा नासा॥३८॥प्रथमोऽध्यायः ॥१॥

तत्र संशयितादर्थाद्योऽर्थो निःसंशयो भवेत् ।
तं जना बहुमन्यन्ते येऽर्थशास्त्रविशारदाः ॥ ५०
यच्चाप्यत्र भवेत्कार्यं गर्हितं लोकनिन्दितम् ।
कर्तव्यं तन्मनुष्येण क्षत्रधर्मेण वर्तता ॥ ५१
निन्दितानि च कर्माणि कुत्सितानि पदेपदे ।
सोपधानि कृतान्येव पाण्डवैरकृतात्मभिः ॥ ५२
अस्मिन्नर्थे पुरा गीताः श्रूयन्ते धर्मचिन्तकैः ।
श्लोका न्यायमवेक्षद्भिस्तत्त्वार्थास्तत्त्वदर्शिभिः ५३
परिश्रान्ते विदीर्णे वा भुञ्जाने वाऽपि शत्रुभिः ।
प्रस्थाने वा प्रवेशे वा प्रहर्तव्यं रिपोर्बलम् ॥ ५४
निद्रार्तमर्धरात्रे च तथा नष्टप्रणायकम् ।
भिन्नयोधं बलं यच्च द्विधा युक्तं च यद्भवेत् ॥५५
इत्येवं निश्चयं चक्रे सुप्तानां निशि मारणे ।
पाण्डूनां सह पाञ्चालैर्द्रोणपुत्रः प्रतापवान् ॥ ५६
स क्रूरां मतिमास्थाय विनिश्चित्य मुहुर्मुहुः ।
सुप्तौ प्राबोधयत्तौ तु मातुलं भोजमेव च ॥ ५७
तौ प्रबुद्धौ महात्मानौ कृपभोजौ महाबलौ ।
नोत्तरं प्रतिपद्येतां तत्र युक्तं ह्रिया वृतौ ॥ ५८
स मुहूर्तमिव ध्यात्वा तावुभौ वाक्यमब्रवीत् ॥५९
हतो दुर्योधनो राजा एकवीरो महाबलः ।
यस्यार्थे वैरमस्माभिरासक्तं पाण्डवैः सह ॥ ६०
एकाकी बहुभिः क्षुद्रैराहवे शुद्धविक्रमः ।
पातितो भीमसेनेन एकादशचमूपतिः ॥ ६१
वृकोदरेण क्षुद्रेण सुनृशंसमिदं कृतम् ।
मूर्धाभिषिक्तस्य शिरः पादेन परिमृद्नता ॥ ६२
विनर्दन्ति च पाञ्चालाः क्ष्वेलन्ति च हसन्ति च ।
धमन्ति शङ्खाञ्शतशो हृष्टा घ्नन्ति च दुन्दुभीन् ६३
वादित्रघोषस्तुमुलो विमिश्रः शङ्खनिःस्वनैः ।
अनिलेनेरितो घोरो दिशः पूरयतीव ह ॥ ६४
अश्वानां हेषमाणानां गजानां चैव बृंहताम् ।
सिंहनादश्च शूराणां श्रूयते सुमहानयम् ॥ ६५
दिशं प्राचीं समाश्रित्य हृष्टानां गच्छतां भृशम् ।
रथनेमिस्वनाश्चैव श्रूयन्ते रोमहर्षणाः ॥ ६६
पाण्डवैर्धार्तराष्ट्राणां यदिदं कदनं कृतम् ।
वयमेव त्रयः शिष्टा अस्मिन्महति वैशसे ॥ ६७
केचिन्नागशतप्राणाः केचित्सर्वास्त्रकोविदाः ।
निहताः पाण्डवैर्यस्मिन्मन्ये कालस्य पर्ययम् ॥६८
एवमेतेन भाव्यं हि नूनं कार्येण तत्त्वतः ।
यथा ह्यस्येदृशी निष्ठा कृते यत्नेऽपि दुष्करे ॥ ६९
भवतोस्तु यदि प्रज्ञा न मोहादपचीयते ।
व्यसनेऽस्मिन्महत्यर्थे यन्नः श्रेयस्तदुच्यताम् ॥७०

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः ॥ २ ॥

कृपेण द्रौणिंप्रति कर्तव्योपदेशः ॥ १ ॥

कृप उवाच ।
श्रुतं ते वचनं सर्वं हेतुयुक्तं मया विभो ।
ममापि तु वचः किंचिच्छृणुष्वाद्य महाभुज ॥ १
आबद्धा मानुषाः सर्वे निबद्धाः कर्मणोर्द्वयोः ।
दैवे पुरुषकारे च परं ताभ्यां न विद्यते ॥ २
न हि दैवेन सिध्यन्ति कार्याण्येकेन सत्तम ।
न चापि कर्मणैकेन द्वाभ्यां सिद्धिस्तु योगतः ॥ ३
ताभ्यामुभाभ्यां सर्वार्था निबद्धा अधमोत्तमाः ।
प्रवृत्ताश्चैव दृश्यन्ते निवृत्ताश्चैव सर्वशः ॥ ४
पर्जन्यः पर्वते वर्षन्किंनु साधयते फलम् ।
कृष्टे क्षेत्रे तथा वर्षन्किं न साधयते फलम् ॥ ५
उत्थानं चापि दैवस्य ह्यनुत्थानं च दैवतम् ।
व्यर्थं भवति सर्वत्र पूर्वस्तत्र विनिश्चयः ॥ ६
सुवृष्टे च यथा देवे सम्यक् क्षेत्रे च कर्षिते ।

दैवे आसमन्तात् बद्धाः पुरुषकारे निहीनतया बद्धाः । तेन दैवं प्रधानं पुरुषकार उपसर्जनमित्युक्तं भवति । आरम्भा

मानुषाः सर्वे इति क० पाठः ॥२॥ उत्थानमिति । दैवस्य प्रधानस्योत्थानं पुरुषकारो व्यर्थं भवति तथाऽनुत्थानमुत्थानहीनं

बीजं महागुणं भूयात्तथा सिद्धिर्हि मानुषी ॥ ७
तयोर्दैवं तु दुश्चिन्त्यं स्ववशेनैव वर्तते ।
प्राज्ञाः पुरुषकारे तु वर्तन्ते दैवमास्थिताः ॥ ८
ताभ्यां सर्वे हि कार्यार्था मनुष्याणां नरर्षभ ।
विचेष्टन्तः स्म दृश्यन्ते निवृत्तास्तु तथैव च ॥ ९
कृतः पुरुषकारश्च सोऽपि दैवेन सिध्यति ।
तथास्य कर्मणः कर्तुरभिनिर्वर्तते फलम् ॥ १०
उत्थानं च मनुष्याणां दक्षाणां दैववर्जितम् ।
अफलं दृश्यते लोके सम्यगप्युपपादितम् ॥ ११
तत्रालसा मनुष्याणां ये भवन्त्यमनस्विनः ।
उत्थानं ते विगर्हन्ति प्राज्ञानां तन्न रोचते ॥ १२
प्रायशो हि कृतं कर्म नाफलं दृश्यते भुवि ।
अकृत्वा च पुनर्दुःखं कर्म पश्येन्महाफलम् ॥१३
चेष्टामकुर्वँल्लभते यदि किंचिद्यदृच्छया ।
यो वा न लभते कृत्वा दुर्दर्शौ तावुभावपि ॥ १४
शक्नोति जीवितुं दक्षो नालसः सुखमेधते ।
दृश्यन्ते जीवलोकेऽस्मिन्दक्षाः प्रायो हितैषिणः १५
यदि दक्षः समारम्भात्कर्मणो नाश्नुते फलम् ।
नास्य वाच्यं भवेत्किंचिल्लब्धव्यं वाऽधिगच्छति १६
नाकृत्वा कर्म लोके हि फलं विन्दति कर्हिचित् ।
स तु वक्तव्यतां याति द्वेष्यो भवति भूयशः ॥१७
एवमेतदनादृत्य वर्तते यस्त्वतोऽन्यथा ।
स करोत्यात्मनोऽनर्थानेष बुद्धिमतां नयः ॥ १८
हीनं पुरुषकारेण यदि दैवेन वा पुनः ।
कारणाभ्यामथैताभ्यामुत्थानमफलं भवेत् ॥ १९
हीनं पुरुषकारेण कर्म त्विह न सिध्यति ॥ २०
दैवतेभ्यो नमस्कृत्य यस्त्वर्थान्सम्यगीहते ।
दक्षो दाक्षिण्यसंपन्नो न स मोघैर्विहन्यते ॥ २१
सम्यगीहा पुनरियं यो वृद्धानुपसेवते ।
आपृच्छति च यच्छ्रेयः करोति च हितं वचः ॥२२
उत्थायोत्थाय हि सदा प्रष्टव्या वृद्धसंमताः ।
ते स्म योगे परं मूलं तन्मूला सिद्धिरुच्यते ॥ २३
वृद्धानां वचनं श्रुत्वा योऽभ्युत्थानं प्रयोजयेत् ।
उत्थानस्य फलं सम्यक्तदा स लभतेऽचिरात् ॥२४
रागात्क्रोधाद्भयाल्लोभाद्योऽर्थानीहेत मानवः ।
अनीशश्चावमानी च स शीघ्रं भ्रश्यते श्रियः ॥२५
सोयं दुर्योधनेनार्थो लुब्धेनादीर्घदर्शिना ।
असमर्थः समारब्धो मूढत्वादविचिन्तितः ॥ २६
हितबुद्धीननादृत्य संमन्त्र्यासाधुभिः सह ।
वार्यमाणोऽकरोद्वैरं पाण्डवैर्गुणवत्तरैः ॥ २७
पूर्वमप्यतिदुःशीलो न धैर्यं कर्तुमर्हति ।
तपत्यर्थे विपन्ने हि मित्राणां न कृतं वचः ॥ २८
अनुवर्तामहे यत्तु तं वयं पापपूरुषम् ।
अस्मानप्यनयस्तस्मात्प्राप्तोऽयं दारुणो महान् ॥२९
अनेन तु ममाद्यापि व्यसनेनोपतापिता ।
बुद्धिश्चिन्तयते किंचित्स्वं श्रेयो नावबुध्यते ॥ ३०
मुह्यता तु मनुष्येण प्रष्टव्याः सुहृदो जनाः ।
तत्रास्य बुद्धिर्विनयस्तत्र श्रेयश्च पश्यति ॥ ३१
ततोऽस्य मूलं कार्याणां बुद्ध्या निश्चित्य वै बुधाः ।
तेऽत्र पृष्टा यथा ब्रूयुस्तत्कर्तव्यं तथा भवेत् ॥३२
ते वयं धृतराष्ट्रं च गान्धारीं च यशस्विनीम् ।
उपपृच्छामहे गत्वा विदुरं च महामतिम् ॥ ३३
ते पृष्टास्तु वदेयुर्यच्छ्रेयो नः समनन्तरम् ।
तदस्माभिः पुनः कार्यमिति मे नैष्ठिकी मतिः ॥३४
अनारम्भात्तु कार्याणां नार्थः संपद्यते क्वचित् ॥३५

दैवमपि व्यर्थमिति पक्षद्वयं सर्वत्र व्यवस्यति तत्र पूर्वएव पक्षः श्रेयानित्यर्थः ॥ ६ ॥ विचेष्टन्तः प्रवृत्ता दृश्यन्ते लोकदृष्ट्येत्यर्थः ॥ ९ ॥ कर्माकृत्वा दुःखं पश्येदित्यपि प्रायशोऽस्ति॥१३॥ दुर्दर्शौ दुर्लभौ॥१४॥स्पर्शं चास्याधिगच्छतीति छ. पाठः । तत्र अस्य कर्मणः स्पर्शं लोकस्य संबन्धं चाधिगच्छति लोकप्रियः स्यादित्यर्थः ॥ १६ ॥ अकृत्वा कर्म यो लोके फलं विन्दति धिष्ठित इति झ. पाठः । तत्र अदक्षस्तु परप्रयत्नार्जितेन जीवन्नपि भोक्तुमेवायं समर्थो नार्जयितुमिति निन्द्यत इति भावः। ॥ १७ ॥ एतत् दैवदाक्ष्ययोः साहित्यम् । अन्यथा तयोरन्यतरालम्बनेन ॥ १८ ॥ योगे अलब्धलाभे ॥ २३ ॥ अनीशः अजितचित्तः । अवमानी परमवजानन् ॥ २५ ॥ द्वितीयोऽध्यायः ॥ २ ॥

कृते पुरुषकारे तु येषां कार्यं न सिध्यति । दैवेनोपहतास्ते तु नात्र कार्या विचारणा ॥ ३६

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः ॥ ३ ॥

द्रौणिना कृपवचनमनादृत्य कृपकृतवर्मणोः पुरतः निशि प्रसुप्तपाण्डुपाञ्चालहननप्रतिज्ञानम् ॥ १ ॥

सञ्जय उवाच ।
कृपस्य वचनं श्रुत्वा धर्मार्थसहितं शुभम् ।
अश्वत्थामा महाराज दुःखशोकसमन्वितः ॥ १
दह्यमानस्तु शोकेन प्रदीप्तेनाग्निना यथा ।
क्रूरं मनस्ततः कृत्वा तावुभौ प्रत्यभाषत ॥ २
पुरुषेपुरुषे बुद्धिर्याया भवति शोभना ।
तुष्यन्ति च पृथक्सर्वे प्रज्ञया ते स्वयास्वया ॥ ३
सर्वो हि मन्यते लोक आत्मानं बुद्धिमत्तरम् ।
सर्वस्यात्मा बहुमतः सर्वोत्मानं प्रशंसति ॥ ४
सर्वस्य हि स्वका प्रज्ञा साधुवादे प्रतिष्ठिता ।
परबुद्धिं च निन्दन्ति स्वां प्रशंसन्ति चासकृत्॥५
कारणान्तरयोगेन येषां संवदते मतिः ।
तेऽन्योन्येन च तुष्यन्ति बहुमन्यन्ति चासकृत् ६
तस्यैव तु मनुष्यस्य सासा बुद्धिस्तदातदा ।
कालयोगे विपर्यासं प्राप्यान्योन्यं विपद्यते ॥ ७
अनित्यत्वात्तु चित्तानां मनुष्याणां विशेषतः ।
चित्तवैक्लव्यमासाद्य सासा बुद्धिः प्रजायते ॥ ८
यथा हि वैद्यः कुशलो ज्ञात्वा व्याधिं यथाविधि ।
भैषज्यं कुरुते योगात्प्रशमार्थमिति प्रभो ॥ ९
एवं कार्यस्य योगार्थं बुद्धिं कुर्वन्ति मानवाः ।
प्रज्ञया च स्वया युक्त्या तां च गृह्णन्ति वै बुधाः १०
अन्यया यौवने बाल्ये बुद्ध्या भवति मोहितः ।
मध्येऽन्यया जरायां तु सोन्यां रोचयते मतिम् ११
व्यसनं वा महाघोरं समृद्धिं चापि तादृशीम् ।
अवाप्य पुरुषो भोज कुरुते बुद्धिवैकृतम् ॥ १२
एकस्मिन्नेव पुरुषे सासा बुद्धिस्तदातदा ।
भवत्यनित्या प्रज्ञा हि सा तस्यैव न रोचते ॥ १३
निश्चित्य तु यथाप्रज्ञं यां मतिं साधु पश्यति ।
तया प्रकुरुते भावं सा तस्योद्योगकारिका ॥ १४
सर्वो हि पुरुषो भोज साध्वेतदिति निश्चितः ।
कर्तुमारभते प्रीतिं मरणादिषु कर्मसु ॥ १५
सर्वे हि युक्तां विज्ञाय प्रज्ञां वापि स्वकां नराः ।
चेष्टन्ते विविधां चेष्टां हितमित्येव जानते ॥ १६
उपजाता व्यसनजा येयमद्य मतिर्मम ।
युवयोस्तां प्रवक्ष्यामि सर्वेषां शोकनाशिनीम् १७
प्रजापतिः प्रजाः सृष्ट्वा कर्म तासु विधाय च ।
वर्णेवर्णे समाधत्त ह्येकैकं गुणवत्तरम् ॥ १८
ब्राह्मणे वेदमग्र्यं तु क्षत्रिये तेज उत्तमम् ।
दाक्ष्यं वैश्ये च शूद्रे च सर्ववर्णानुकूलताम् ॥ १९
अदान्तो ब्राह्मणोऽसाधुर्निस्तेजाः क्षत्रियो मतः ।
अदक्षो निन्द्यते वैश्यः शूद्रश्च प्रतिकूलवान् ॥ २०
सोऽस्मि जातः कुले श्रेष्ठे ब्राह्मणैरभिपूजिते ।
मन्दभाग्यतयाऽस्म्येतं क्षत्रधर्ममनुष्ठितः ॥ २१
क्षत्रधर्मं विदित्वाऽहं यदि ब्राह्मण्यमाश्रितः ।
प्रकरिष्ये महत्कर्म न मे तत्साधुसंमतम् ॥ २२
धारयित्वा धनुर्दिव्यं दिव्यान्यस्त्राणि चाहवे ।
पितरं निहतं दृष्ट्वा किंनु वक्ष्यामि संसदि ॥ २३
सोऽहमद्य यथाकामं क्षत्रधर्ममवाप्य च ।

सर्वोत्मानमित्यत्र सर्वः आत्मानमिति च्छेदः । संधिरार्षः ॥ ४ ॥ योगे येषां समा गतिरिति झ. पाठः । तत्र योगे समुदाये इत्यर्थः ॥ ६ ॥ तां च निन्दन्ति मानवा इति झ. पाठः ॥ १० ॥ हे भोज हे कृतवर्मन् । एकमेव संबोधयन् कृपस्य वचसि अनादरं सूचयति ॥ १२ ॥ भवत्यकृतबुद्धित्वादिति झ. पाठः । तत्र अकृतधर्मत्वात् अवसरानुरोधात् । इदानीं मम शान्तिबुद्धिर्न रोचते इत्यर्थः ॥ १३ ॥ क्षत्रियोऽधम इति झ पाठः ॥ २० ॥ विदित्वा आश्रित्य ॥ २२ ॥

गन्ताऽसि पदवीं राज्ञः पितुश्चापि महात्मनः २४
अद्य स्वप्स्यन्ति पाञ्चाला विश्वस्ता जितकाशिनः।
विमुक्तयुग्यकवचा हर्षेण च समन्विताः।
वयं जिता मताश्चैषां श्रान्ता व्यायामकर्शिताः २५
तेषां निशि प्रसुप्तानां सुस्थानां शिबिरे स्वके।
अवस्कन्दं करिष्यामि शिबिरस्याद्य दुष्करम्॥ २६
तानवस्कन्द्य शिबिरे प्रेतभूतानचेतसः।
सूदयिष्यामि विक्रम्य मघवानिव दानवान्॥ २७
अद्य तान्सहितान्सर्वान्धृष्टद्युम्नपुरोगमान्।
सूदयिष्यामि विक्रम्य कक्षं दीप्त इवानलः॥ २८
निहत्य चैव पाञ्चालाञ्शान्तिं लब्धाऽस्मि सत्तम॥
पाञ्चालेषु चरिष्यामि सूदयन्नद्य संयुगे।
पिनाकपाणिः संक्रुद्धः स्वयं रुद्रः पशुष्विव॥ ३०
अद्याहं सर्वपाञ्चालान्निकृत्या च निकृष्य च।
अर्दयिष्यामि संहृष्टो रणे पाण्डुसुतांस्तथा।
'सूदयिष्यामि संक्रुद्धः पशूनिव पिनाकधृत्॥' ३१
अद्याहं सर्वपाञ्चालैः कृत्वा भूमिं शरीरिणीम्।
प्रहृत्यैकेन शस्त्रेण भविष्याम्यनृणः पितुः॥ ३२
दुर्योधनस्य कर्णस्य भीष्मसैन्धवयोरपि।
गमिष्यामि निशावेलां पदवीमद्य दुर्गमाम्॥ ३३
अद्य पाञ्चालराजस्य धृष्टद्युम्नस्य वै निशि।
विरात्रे प्रमथिष्यामि पशोरिव शिरो बलात्॥ ३४
अद्य पाञ्चालपाण्डूनां शयितानां शिरो निशि।
खड्गेन निशितेनाजौ प्रमथिष्यामि गौतम॥ ३५
अद्य पाञ्चालसेनां तां निहत्य निशि सौप्तिके।
कृतकृत्यः सुखी चैव भविष्यामि महामते॥ ३६

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि तृतीयोऽध्यायः॥ ३॥

चतुर्थोऽध्यायः॥ ४॥

द्रौणिकृपयोः संवादः॥ १॥

कृप उवाच।
दिष्ट्या ते प्रतिकर्तव्ये मतिर्जातेयमच्युत।
न त्वां वारयितुं शक्तो वज्रपाणिरपि स्वयम्॥ १
अनुयास्यावहे त्वां तु प्रभाते सहितावुभौ।
अद्य रात्रौ विश्रमस्व विमुक्तकवचध्वजः॥ २
अहं त्वामनुयास्यामि कृतवर्मा च सात्वतः।
परानभिमुखं यान्तं रथावास्थाय दंशितौ॥ ३
आवाभ्यां सहितः शत्रूञ्श्वो निहन्ता समागमे।
विक्रम्य रथिनां श्रेष्ठ पाञ्चालान्सपदानुगान्॥ ४
शक्तस्त्वमसि विक्रम्य विश्रमस्व निशामिमाम्।
चिरं ते जाग्रतस्तात स्वप तावन्निशामिमाम्॥ ५
विश्रान्तश्च विनिद्रश्च स्वस्थचित्तश्च मानद।
समेत्य समरे शत्रून्वधिष्यसि न संशयः॥ ६
न हि त्वां रथिनां श्रेष्ठं प्रगृहीतवरायुधम्।
जेतुमुत्सहते कश्चिदपि देवेषु पावकिः॥ ७
कृपेण सहितं यान्तं गुप्तं च कृतवर्मणा।
को द्रौणिं युधि संरब्धं योधयेदपि देवराट्॥ ८
ते वयं निशि विश्रान्ता विनिद्रा विगतज्वराः।
प्रभातायां रजन्यां वै निहनिष्याम शात्रवान्॥ ९
तव ह्यस्त्राणि दिव्यानि मम चैव न संशयः।
सात्वतोपि महेष्वासो नित्यं युद्धेषु कोविदः॥ १०
ते वयं सहितास्तात सर्वाञ्शत्रून्समागतान्।
प्रसह्य समरे हत्वा प्रीतिं प्राप्स्याम पुष्कलाम्॥ ११
विश्रमस्व त्वमव्यग्रः स्वप चेमां निशां सुखम्।
अहं च कृतवर्मा च प्रभाते त्वां नरोत्तमम्॥ १२
अनुयास्याव सहितौ धन्विनौ परतापनौ।
रथिनं त्वरया यान्तं रथमास्थाय दंशितौ॥ १३
स गत्वा शिबिरं तेषां नाम विश्राव्य चाहवे।
ततः कर्ताऽसि शत्रूणां युध्यतां कदनं महत्॥ १४
कृत्वा च कदनं तेषां प्रभाते विमलेऽहनि।

गन्तासि गमिष्यामि। पदवीं आनृण्यम्॥ २४॥ गमयिष्यामि पाञ्चालान्पदवीमथ. दुर्गमामिति. झ. पाठः॥ ३३॥ तृतीयोऽध्यायः॥ ३॥

निहन्ता निहनिष्यसि॥ ४॥

विहरस्व यथा शक्रः सूदयित्वा महासुरान् ॥ १५
त्वं हि शक्तो रणे जेतुं पाञ्चालानां वरूथिनीम् ।
दैत्यसेनामिव क्रुद्धः सर्वदानवसूदनः ॥ १६
मया त्वां सहितं सङ्ख्ये गुप्तं च कृतवर्मणा ।
न सहेत विभुः साक्षाद्वज्रपाणिरपि स्वयम् ॥ १७
न चाहं समरे तात कृतवर्मा न चैव हि ।
अनिर्जित्य रणे पाण्डूनपयास्यामि कर्हिचित् ॥१८
हत्वा च समरे क्षुद्रान्पाञ्चालान्पाण्डुभिः सह ।
निवर्तिष्यामहे सर्वे हता वा स्वर्गगा वयम् ॥ १९
सर्वोपायैः सहायास्ते प्रभाते वयमाहवे ।
सत्यमेतन्महाबाहो प्रब्रवीमि तवानघ ॥ २०
एवमुक्तस्ततो द्रौणिर्मातुलेन हितं वचः ।
अब्रवीन्मातुलं राजन्क्रोधादुद्धृत्य लोचने ॥ २१
आतुरस्य कुतो निद्रा नरस्यामर्षितस्य च ।
अर्थांश्चिन्तयतश्चापि कामयानस्य वा पुनः ॥ २२
तदिदं समनुप्राप्तं पश्य मेऽद्य चतुष्टयम् ।
यस्य भागश्चतुर्थो मे स्वप्नमह्नाय नाशयेत् ॥ २३
किं नाम दुःखं लोकेऽस्मिन्पितुर्वधमनुस्मरन् ।
हृदयं निर्दहन्मेऽद्य रात्र्यहानि न शाम्यति ॥ २४
यथा च निहतः पापैः पिता मम विशेषतः ।
प्रत्यक्षमपि ते सर्वे तन्मे मर्माणि कृन्तति ॥ २५
कथं हि मादृशो लोके मुहूर्तमपि जीवति ।
द्रोणहन्तेति यद्वाचः पाञ्चालानां शृणोम्यहम् २६
धृष्टद्युम्नमहत्वा तु नाहं जीवितुमुत्सहे ।
स मे पितुर्वधाद्वध्यः पाञ्चाला ये च संगताः २७
विलापो भग्नसक्थस्य यस्तु राज्ञो मया श्रुतः ।
स पुनर्हृदयं कस्य क्रूरस्यापि न निर्दहेत् ॥ २८
कस्य ह्यकरुणस्यापि नेत्राभ्यामश्रु नाव्रजेत् ।
नृपतेर्भग्नसक्थस्य श्रुत्वा तादृग्वचः पुनः ॥ २९
यश्चायं मित्रपक्षो मे मयि जीवति निर्जितः ।
शोकं मे वर्धयत्येष वारिवेग इवार्णवम् ॥ ३०
एकाग्रमनसो मेऽद्य कुतो निद्रा कुतः सुखम् ॥३१
वासुदेवार्जुनाभ्यां च तानहं परिरक्षितान् ।
अविषह्यतमान्मन्ये महेन्द्रेणापि सत्तम ॥ ३२
न चापि शक्तः संयन्तुमस्मात्कार्यात्कथंचन ।
तं न पश्यामि लोकेऽस्मिन्यो मां कोपान्निवर्तयेत् ॥
इति मे निश्चिता बुद्धिरेषा साधुमता मम ॥ ३४
वादिकैः कथ्यमानस्तु मित्राणां मे पराभवः ।
पाण्डवानां च विजयो हृदयं दहतीव मे ॥ ३५
अहं तु कदनं कृत्वा शत्रूणामद्य सौप्तिके ।
ततो विश्रमिता चैव स्वप्ता च विगतज्वरः ॥ ३६

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः ॥ ५ ॥

कृपेण प्रसुप्तमारणस्याधार्मिकत्वकथनेन प्रतिषेधनेऽपि पितृवधामर्षिणा द्रौणिना जिघांसया रिपुशिबिरद्वारगमनम् ॥ १ ॥ कृपकृतवर्मभ्यामपि सौहार्दात्तदनुगमनम् ॥ २ ॥

कृप उवाच ।
शुश्रूषुरपि दुर्मेधाः पुरुषोऽनियतेन्द्रियः ।
नालं वेदयितुं कृत्स्नौ धर्मार्थाविति मे मतिः ॥१
तथैव तावन्मेधावी विनयं यो न शिक्षते ।
न च किंचन जानाति सोऽपि धर्मार्थनिश्चयम् ॥२
[चिरं ह्यपि जडः शूरः पण्डितं पर्युपास्य ह ।
न स धर्मान्विजानाति दर्वी सूपरसानिव ॥ ३
मुहूर्तमपि तं प्राज्ञः पण्डितं पर्युपास्य हि ।
क्षिप्रं धर्मान्विजानाति जिह्वा सूपरसानिव ॥ ४
शुश्रूषुस्त्वेव मेधावी पुरुषो नियतेन्द्रियः ।

चतुर्थं आतुरादीनां चतुर्णां मध्ये एको भागः अमर्षः । मे मम स्वप्नं अह्नाय झटिति नाशयेत् । तस्मात् स्वपेत्युक्तं तन्न युज्यते ॥ २३ ॥ अनुस्मरन् अनुस्मरतः । न शाम्यति अमर्ष इत्यर्थः ॥ २४ ॥

स्वप्ता स्वप्स्यामि ॥ ३६ ॥ चतुर्थोऽध्यायः ॥ ४ ॥

अशुश्रूषुः सुदुर्मेधा इति ङ. पाठः । दुर्मेधाः मूढः । अनियतेविच्छेदः ॥ १ ॥

जानीयादागमान्सर्वान्ग्राह्यं च न विरोधयेत् ॥ ५
अनयस्त्ववमानी यो दुरात्मा पापपूरुषः ।
दिष्टमुत्सृज्य कल्याणं करोति बहुपातकम् ॥ ६
नाथवन्तं तु सुहृदः प्रतिषेधन्ति पातकात् ।
निवर्तते तु लक्ष्मीवान्नालक्ष्मीवान्निवर्तते ॥ ७
यथा ह्युच्चावचैर्वाक्यैः क्षिप्तचित्तो नियम्यते ।
तथैव सुहृदा शक्यो नशक्यस्त्ववसीदति ॥ ८
तथैव सुहृदोऽप्राज्ञान्कुर्वाणान्कर्म पापकम् ।
प्राज्ञाः संप्रतिषेधन्ति यथाशक्ति पुनःपुनः ॥ ९
स कल्याणे मनः कृत्वा नियम्यात्मानमात्मना ।
कुरु मे वचनं तात येन पश्चान्न तप्स्यसे ॥ १०
न वधः पूज्यते लोके सुप्तानामिह धर्मतः ।
तथैव न्यस्तशस्त्राणां विमुक्तरथवाजिनाम् ॥ ११
ये च ब्रूयुस्तवास्मीति ये च स्युः शरणागताः ।
विमुक्तमूर्धजा ये च ये चापि हतवाहनाः ॥ १२
अद्य स्वप्स्यन्ति पाञ्चाला विमुक्तकवचा विभो ।
विश्वस्ता रजनीं सर्वे प्रेता इव विचेतसः ॥ १३
यस्तेषां तदवस्थानां द्रुह्येत पुरुषोऽनृजुः ।
व्यक्तं स नरके मज्जेदगाधे विपुलेऽप्लवे ॥ १४
सर्वास्त्रविदुषां लोके श्रेष्ठस्त्वमसि विश्रुतः ।
न च ते जातु लोकेऽस्मिन्सुसूक्ष्ममपि किल्बिषम् ॥ १५
त्वं पुनः सूर्यसंकाशः श्वोभूत उदिते रवौ ।
प्रकाशे सर्वभूतानां विजेता युधि शात्रवान् ॥ १६
असंभावितरूपं हि त्वयि कर्म विगर्हितम् ।
शुक्ले रक्तमिव न्यस्तं भवेदिति मतिर्मम ॥ १७

अश्वत्थामोवाच ।

एवमेव यथाऽऽत्थ त्वमनुशाससि मातुल ।
तैस्तु पूर्वमयं सेतुः समन्ताद्विदलीकृतः ॥ १८
प्रत्यक्षं भूमिपालानां भवतां चापि सन्निधौ ।
न्यस्तशस्त्रो मम पिता धृष्टद्युम्नेन पातितः ॥ १९
कर्णश्च पतिते चक्रे उत्थास्यन्रथिनां वरः ।
उत्तमे व्यसने मग्नो हतो गाण्डीवधन्वना ॥ २०
तथा शान्तनवो भीष्मो न्यस्तशस्त्रो निरायुधः ।
शिखण्डिनं पुरस्कृत्य हतो गाण्डीवधन्वना ॥ २१
भूरिश्रवा महेष्वासस्तथा प्रायगतो रणे ।
क्रोशतां भूमिपालानां युयुधानेन पातितः ॥ २२
दुर्योधनश्च भीमेन समेत्य गदया मृधे ।
पश्यतां भूमिपालानामधर्मेण निपातितः ॥ २३
एकाकी बहुभिस्तत्र परिवार्य महारथैः ।
अधर्मेण नरव्याघ्रो भीमसेनेन पातितः ॥ २४
विलापो भग्नसक्थस्य यो मे राज्ञः परिश्रुतः ।
वार्तिकानां कथयतां स मे मर्माणि कृन्तति ॥ २५
एवं चाधार्मिकाः पापाः पाञ्चाला भिन्नसेतवः ।
तानेवं भिन्नमर्यादान्किं भवान्न विगर्हति ॥ २६
पितृहन्तॄनहं हत्वा पाञ्चालान्निशि सौप्तिके ।
कामं कीटः पतङ्गो वा जन्म प्राप्य भवामि वै ॥ २७
त्वरे चाहमनेनाद्य यदिदं मे चिकीर्षितम् ।
तस्य मे त्वरमाणस्य कुतो निद्रा कुतः सुखम् ॥ २८
न स जातः पुमाँल्लोके कश्चिन्न स भविष्यति ।
यो मे व्यावर्तयेदेतां वधे तेषां कृतां मतिम् ॥ २९

सञ्जय उवाच ।

एवमुक्त्वा महाराज द्रोणपुत्रः प्रतापवान् ।
एकान्ते योजयित्वाऽश्वान्प्रायादभिमुखः परान् ॥ ३०
तमब्रूतां महात्मानौ भोजशारद्वतावुभौ ।
किमयं स्यन्दनो युक्तः किं च कार्यं चिकीर्षितम् ॥ ३१
एकसार्थप्रयातौ स्वस्त्वया सह नरर्षभ ।
समदुःखसुखौ चापि नस्माच्छंसितुमर्हसि ॥ ३२
अश्वत्थामा तु संक्रुद्धः पितुर्वधमनुस्मरन् ।
ताभ्यां तथ्यं तथाऽऽचख्यौ यदस्यात्मचिकीर्षितम् ।
हत्वा शतसहस्राणि योधानां निशितैः शरैः ।
न्यस्तशस्त्रो मम पिता धृष्टद्युम्नेन पातितः ॥ ३४
तं तथैव वधिष्यामि न्यस्तवर्माणमद्य वै ।
पुत्रं पाञ्चालराजस्य पापं पापेन कर्मणा ॥ ३५
तथा विनिहतः पापः पाञ्चाल्यः पशुवन्मया ।

अनेय इति झ. पाठः । तत्र अनेयः सन्मार्गं नेतुमशक्यः । दिष्टमुपदिष्टम् ॥ ६ ॥ उच्चावचैः सर्गैरिति क. छ. पाठः ॥ ८ ॥

अप्लवे इति च्छेदः ॥ १४ ॥ अधर्मेण नाभेरधस्तात्प्रहारेण ॥ २३ ॥ नावां शङ्कितुमर्हसीति झ. पाठः ॥ ३२ ॥

शस्त्रेण विजिताँल्लोकान्प्राप्नुयादिति मे मतिः ३६
क्षिप्रं सन्नद्धकवचौ सखड्गावात्तकार्मुकौ ।
मामेवाद्य प्रतीक्षेतां रथवर्यौ परंतपौ ॥ ३७
इत्युक्त्वा रथमास्थाय प्रायादभिमुखः परान् ।
तमन्वगात्कृपो राजन्कृतवर्मा च सात्वतः ॥ ३८
ते प्रयाता व्यरोचन्त परानभिमुखास्त्रयः ।
हूयमाना यथा यज्ञे समिद्धा हव्यवाहनाः ॥ ३९
ययुश्च शिबिरं तेषां संप्रसुप्तजनं विभो ।
द्वारदेशमनुप्राप्य द्रौणिस्तस्थौ महारथः ॥ ४०

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः ॥ ६ ॥

अश्वत्थाम्नः शिबिरद्वारस्थमहाभूतदर्शनम् ॥ १ ॥ भूतजिगीषया द्रौणिविसृष्टानामस्त्रशस्त्राणां भूतेन ग्रसनम् ॥ २ ॥ ततश्चिंतातान्तस्य द्रौणेर्महादेवोपासनाध्यवसायः ॥ ३ ॥

धृतराष्ट्र उवाच ।
द्वारदेशे ततो द्रौणिमवस्थितमवेक्ष्य तौ ।
अकुर्वतां भोजकृपौ किं सञ्जय वदस्व मे ॥ १
सञ्जय उवाच ।
कृतवर्माणमामन्त्र्य कृपं च स महारथः ।
द्रौणिर्मन्युपरीतात्मा शिबिरद्वारमासदत् ॥ २
तत्र भूतं महाकायं चन्द्रार्कसदृशद्युतिम् ।
सोऽपश्यद्द्वारमावृत्य तिष्ठन्तं रोमहर्षणम् ॥ ३
वसानं चर्म वैयाघ्रं वसारुधिरविस्रवम् ।
कृष्णाजिनोत्तरासङ्गं नागयज्ञोपवीतिनम् ॥ ४
बाहुभिः स्वायतैर्भीमैर्नानाप्रहरणोद्यतैः ।
बद्धाङ्गदमहासर्पं ज्वालामालाकुलाननम् ॥ ५
दंष्ट्राकरालवदनं व्यादितास्यं भयानकम् ।
नयनानां सहस्रैश्च विचित्रैरभिभूषितम् ॥ ६
नैव तस्य वपुः शक्यं प्रवक्तुं वेष एव च ।
सर्वथा तु तदालक्ष्य स्फुटेयुरपि पर्वताः ॥ ७
तस्यास्यनासिकाभ्यां च श्रवणाभ्यां च सर्वशः ।
तेभ्यश्चाक्षिसहस्रेभ्यः प्रादुरासन्महार्चिषः ॥ ८
तथा तेजोमरीचिभ्यः शङ्खचक्रगदाधराः ।
प्रादुरासन्हृषीकेशाः शतशोऽथ सहस्रशः ॥ ९
तदत्यद्भुतमालोक्य भूतं लोकभयंकरम् ।
द्रौणिरव्यथितो दिव्यैरस्त्रवर्षैरवाकिरत् ॥ १०
द्रौणिमुक्ताञ्छरांस्तांस्तु तद्भूतं महदग्रसत् ।
उदधेरिव वार्योघान्पावको बडवामुखः ॥ ११
अश्वत्थामा तु संप्रेक्ष्य शरौघांस्तान्निरर्थकान् ।
रथशक्तिं मुमोचास्मै दीप्तामग्निशिखामिव ॥ १२
सा तमाहत्य दीप्ताग्रा रथशक्तिरदीर्यत ।
युगान्ते सूर्यमाहत्य महोल्केव दिवश्च्युता ॥ १३
अथ हेमत्सरुं दिव्यं खड्गमाकाशवर्चसम् ।
कोशात्समुद्बबर्हाशु बिलाद्दीप्तमिवोरगम् ॥ १४
ततः खड्गवरं धीमान्भूताय प्राहिणोत्तदा ।
स तदासाद्य भूतं वै विलयं तूलवद्ययौ ॥ १५
ततः स कुपितो द्रौणिरिन्द्रकेतुनिभां गदाम् ।
ज्वलन्तीं प्राहिणोत्तस्मै भूतं तामपि चाग्रसत् ॥ १६
ततः सर्वायुधाभावे वीक्षमाणस्ततस्ततः ।
अपश्यत्कृतमाकाशमनाकाशं जनार्दनैः ॥ १७
तदद्भुततमं दृष्ट्वा द्रोणपुत्रो निरायुधः ।
अचिन्तयत्सुसंत्रस्तः कृपभोजवचः स्मरन् ॥ १८
ब्रुवतामप्रियं पथ्यं सुहृदां न शृणोति यः ।
स शोचत्यापदं प्राप्य यथाऽहमवमत्य तौ ॥ १९
शास्त्रदृष्टानविद्वान्यः समतीत्य जिघांसति ।
स पथः प्रच्युतो धर्म्यात्कुपथे प्रतिहन्यते ॥ २०

शस्त्राग्निवर्जिताँल्लोकान्प्राप्नुयादिति मे मतिः इति ङ. पाठः ॥ ३६ ॥ पञ्चमोऽध्यायः ॥ ५ ॥
रथशक्तिं चक्रम् ॥ १२ ॥ युग्मान्ते सूर्यमिति झ. पाठः

तत्र युग्मांते मिथुनराशेरन्ते अतिदीप्तं इत्यर्थः ॥ १३ ॥ विलं नकुलवद्ययौ इति झ. पाठः ॥ १५ ॥ अनाकाशं निरवकाशम् ॥ १७ ॥ षष्ठोऽध्यायः ॥ ६ ॥

गोब्राह्मणनृपस्त्रीषु सख्युर्मातुर्गुरोस्तथा ।
वृद्धबालजडान्धेषु सुप्तभीतोत्थितेषु च ॥ २१
मत्तोन्मत्तप्रमत्तेषु न शस्त्राणि च पातयेत् ।
इत्येवं गुरुभिः पूर्वमुपदिष्टं नृणां सदा ॥ २२
सोऽहमुत्क्रम्य पन्थानं शास्त्रदृष्टं सनातनम् ।
अमार्गेणैवमारभ्य घोरामापदमागतः ॥ २३
तां चापदं घोरतरां प्रवदन्ति मनीषिणः ।
यदुद्यम्य महत्कृत्यं भयादपि निवर्तते ॥ २४
अशक्यं चैव कः कर्तुं शक्तः शक्तिबलादिह ।
न हि दैवाद्गरीयो वै मानुष्यं किंचिदिष्यते ॥२५
मानुष्यं कुर्वतः कर्म यदि दैवान्न सिध्यति ।
स पथः प्रच्युतो धर्म्याद्विपदं प्रतिपद्यते ॥ २६
प्रतिज्ञानं ह्यविज्ञानं प्रवदन्ति मनीषिणः ।
यदारभ्य क्रियां कांचिद्भयादिह निवर्तते ॥२७
तदिदं दुष्प्रणीतेन भयं मां समुपस्थितम् ।
न हि द्रोणसुतः सङ्ख्ये निवर्तेत कथंचन ॥ २८
इदं च सुमहद्भूतं दैवदण्डमिवोद्यतम् ।
न चैतदभिजानामि चिन्तयन्नपि सर्वथा ॥ २९
ध्रुवं येयमधर्मेण प्रहिता कलुषा मतिः ।
तस्याः फलमिदं घोरं प्रतिघाताय कल्पते ॥ ३०
तदिदं दैवविहितं मम सङ्ख्ये निवर्तनम् ।
नान्यत्र दैवादुद्यन्तुमिह शक्यं कथंचन ॥ ३१
सोऽहमद्य महादेवं प्रपद्ये शरणं विभुम् ।
दैवदण्डमिमं घोरं स हि मे नाशयिष्यति ॥ ३२
कपर्दिनं प्रपद्येऽहं देवदेवमुमापतिम् ।
कपालमालिनं रुद्रं भगनेत्रहरं हरम् ॥ ३३
स हि देवोऽत्यगाद्देवांस्तपसा विक्रमेण च ।
तस्माच्छरणमभ्येष्ये गिरिशं शूलपाणिनम् ॥ ३४

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः ॥ ७ ॥

द्रौणिना शिवस्तुतिः ॥ १ ॥ द्रौणेः पुरतः काञ्चनवेद्यामग्न्युद्भवः ॥ २ ॥ द्रौणेः समीपे नानाविधभीषणभूतगणानामागमनम् ॥ ३ ॥ शिवेन आत्मनो हविष्ट्वकल्पनपूर्वकमग्नौ प्रविष्टाय द्रौणये खड्गदानपूर्वकं तच्छरीरप्रवेशः ॥ ४ ॥ पुनरश्वत्थाम्नः शिबिरगमनम् ॥ ५ ॥

सञ्जय उवाच ।
एवं संचिन्तयित्वा तु द्रोणपुत्रो विशांपते ।
अवतीर्य रथोपस्थाद्दध्यौ स प्रयतः स्थितः ॥ १
द्रौणिरुवाच ।
उग्रं स्थाणुं शिवं रुद्रं शर्वमीशानमीश्वरम् ।
गिरिशं वरदं देवं भवभावनमव्ययम् ॥ २
शितिकण्ठमजं रुद्रं दक्षक्रतुहरं हरम् ।
विश्वरूपं विरूपाक्षं बहुरूपमुमापतिम् ॥ ३
श्मशानवासिनं दृप्तं महागणपतिं विभुम् ।
खट्वाङ्गधारिणं मुण्डं जटिलं ब्रह्मचारिणम् ॥ ४
मनसा ह्यनुचिन्त्यैनं दुष्करेणाल्पचेतसा ।
अद्य भूतोपहारेण यक्ष्ये त्रिपुरघातिनम् ॥ ५
स्तुतं स्तुत्यं स्तूयमानममोघं कृत्तिवाससम् ।
विलोहितं नीलकण्ठमसह्यं दुर्निवारणम् ॥ ६
शुक्रं विश्वसृजं ब्रह्म ब्रह्मचारिणमेव च ।
व्रतवन्तं तपोनिष्ठमनन्तं तपतां गतिम् ॥ ७
बहुरूपं गणाध्यक्षं त्र्यक्षं पारिषदप्रियम् ।
धनाध्यक्षप्रियसखं गौरीहृदयवल्लभम् ॥ ८
कुमारपितरं पिङ्गं गोवृषोत्तमवाहनम् ।
कृत्तिवाससमत्युग्रमुमातोषणतत्परम् ॥ ९
परं परेभ्यः परमं परं यस्मान्न विद्यते ।
इष्वस्त्रोत्तमभर्तारं दिगन्तं देशरक्षिणम् ॥ १०
हिरण्यकवचं देवं चन्द्रमौलिविभूषणम् ।
प्रपद्ये शरणं देवं परमेण समाधिना ॥ ११

रथोपस्थाद्दध्यौ स प्रयतः स्थितः इति क. पाठः ॥ १ ॥ सोऽहमात्मोपहारेणेति झ. पाठः ॥ ५ ॥ उमाभूषणतत्परमिति झ. पाठः ॥ ९ ॥ हिरण्यदण्डकवचं चारुमौलिविभूषणमिति क. पाठः ॥ ११ ॥

इमां चेदापदं घोरां तराम्यद्य सुदुस्तराम् ।
सर्वभूतोपहारेण यक्ष्येऽहं शुचिना शुचिम् ॥ १२
इति तस्य व्यवसितं ज्ञात्वा योगात्सुकर्मणः ।
पुरस्तात्काञ्चनी वेदी प्रादुरासीन्महात्मनः ॥ १३
तस्यां वेद्यां तदा राजंश्चित्रभानुरजायत ।
स दिशो विदिशः खं च ज्वालाभिरिव पूरयन् ॥ १४
दीप्तास्यनयनाश्चात्र नैकपादशिरोधराः ।
[रत्नचित्राङ्गदधराः समुद्यतकरास्तथा ॥] १५
द्विपाः शैलप्रतीकाशाः प्रादुरासन्महागणाः ।
श्ववराहोष्ट्ररूपाश्च हयगोमायुगोमुखाः ॥ १६
ऋक्षमार्जारवदना व्याघ्रद्वीपिमुखास्तथा ।
काकवक्त्राः प्लवमुखाः शुकवक्त्रास्तथैव च ॥ १७
महाजगरवक्त्राश्च हंसवक्त्राः शितप्रभाः ।
दार्वाघाटमुखाश्चापि चाषवक्त्राश्च भारत ॥ १८
कूर्मनक्रमुखाश्चैव शिंशुमारमुखास्तथा ।
महामकरवक्त्राश्च तिमिवक्त्रास्तथैव च ॥ १९
हरिवक्त्राः क्रौञ्चमुखाः कपोताभमुखास्तथा ।
पारावतमुखाश्चैव मद्गुवक्त्रास्तथैव च ॥ २०
पाणिकर्णाः सहस्राक्षास्तथैव च महोदराः ।
निर्मांसाः काकवक्त्राश्च श्येनवक्त्राश्च भारत ॥ २१
तथैवाशिरसो राजन्नृक्षवक्त्राश्च भीषणाः ।
प्रदीप्तनेत्रजिह्वाश्च ज्वालावर्णास्तथैव च ॥ २२
ज्वालाकेशाश्च राजेन्द्र ज्वलद्रोमचतुर्भुजाः ।
मेषवक्त्रास्तथैवान्ये तथा छागमुखा नृप ॥ २३
शङ्खाभाः शङ्खवक्त्राश्च शङ्खवर्णास्तथैव च ।
शङ्खमालापरिकराः शङ्खध्वनिसमस्वनाः ॥ २४
जटाधराः पञ्चशिखास्तथा मुण्डाः कृशोदराः ।
चतुर्दंष्ट्राश्चतुर्जिह्वाः शङ्कुकर्णाः किरीटिनः ॥ २५
मौञ्जीधराश्च राजेन्द्र तथा कुञ्चितमूर्धजाः ।
उष्णीषिणः कुण्डलिनश्चारुवक्त्राः स्वलंकृताः ॥ २६
पद्मोत्पलापीडधरास्तथा मुकुटधारिणः ।
माहात्म्येन च संयुक्ताः शतशोऽथ सहस्रशः ॥ २७
शतघ्नीचक्रहस्ताश्च तथा मुसलपाणयः ।
भुशुण्डीपाशहस्ताश्च दण्डहस्ताश्च भारत ॥ २८
पृष्ठेषु बद्धेषुधयश्चित्रबाणोत्कटास्तथा ।
सध्वजाः सपताकाश्च सघण्टाः सपरश्वधाः ॥ २९
महापाशोद्यतकरास्तथा लगुडपाणयः ।
स्थूणाहस्ताः खड्गहस्ताः सर्पोच्छ्रितकिरीटिनः ॥ ३०
महासर्पाङ्गदधराश्चित्राभरणधारिणः ।
रजोध्वजाः पङ्कदिग्धाः सर्वे चित्राम्बरस्रजः ।
नीलाङ्गाः पिङ्गलाङ्गाश्च मुण्डवक्त्रास्तथैव च ॥ ३१
भेरीशङ्खमृदङ्गांश्च झर्झरानकगोमुखान् ।
अवादयन्पारिषदाः प्रहृष्टाः कनकप्रभाः ॥ ३२
गायमानास्तथैवान्ये संहृष्टाः पुरुषर्षभाः ।
लङ्घयन्तः प्लवन्तश्च वल्गन्तश्च महारथाः ॥ ३३
धावन्तो जवनाश्चण्डाः पावकोद्धूतमूर्धजाः ।
मत्ता इव महानागा विनदन्तो मुहुर्मुहुः ॥ ३४
सुभीमा घोररूपाश्च शूलपट्टसपाणयः ।
नानाविरागवसनाश्चित्रमाल्यानुलेपनाः ॥ ३५
रत्नचित्राङ्गदधराः समुद्यतकरास्तथा ।
हन्तारो द्विषतां शूराः प्रसह्यासह्यविक्रमाः ॥ ३६
पातारोऽसृग्वसाज्यानां मांसान्त्रकृतभोजनाः ।
चूडालाः कर्णिकाराश्च प्रहृष्टाः पिठरोदराः ॥ ३७
अतिह्रस्वातिदीर्घाश्च प्रलम्बाश्चातिभैरवाः ।
विकटाः काललंबोष्ठा बृहच्छेफाण्डपिण्डिकाः ॥ ३८
महार्हनानाविकटा मुण्डाश्च जटिलाः परे ।
सार्केन्दुग्रहनक्षत्रां द्यां कुर्युस्ते महीतले ॥ ३९
उत्सहेरंश्च ये हन्तुं भूतग्रामं चतुर्विधम् ।
ये च वीतभया नित्यं हरस्य भ्रुकुटीसहाः ॥ ४०
कामकारकरा नित्यं त्रैलोक्यस्येश्वरेश्वराः ।
नित्यानन्दप्रमुदिता वागीशा वीतमत्सराः ॥ ४१
प्राप्याष्टगुणमैश्वर्यं ये न यास्यन्ति वै स्मयम् ।
येषां विस्मयते नित्यं भगवान्कर्मभिर्हरः ॥ ४२
मनोवाक्कर्मभिर्युक्तैर्नित्यमाराधितश्च यैः ।
मनोवाक्कर्मभिर्भक्तान्पाति पुत्रानिवौरसान् ॥ ४३
पिबन्तोऽसृग्वसाश्चान्ये क्रुद्धा ब्रह्मद्विषां सदा ।

प्लवमुखाः मण्डूकवक्त्राः ॥ १७ ॥ दार्वाघाटः पक्षिविशेषः । महागजसवक्त्राश्चेति क. पाठः ॥ १८ ॥ पिण्डिका जानुनोरधः- पश्चाद्भागः ॥ ३८ ॥

चतुर्विधात्मकं सोमं ये पिबन्ति च सर्वदा ॥ ४४
श्रुतेन ब्रह्मचर्येण तपसा च दमेन च ।
ये समाराध्य शूलाङ्कं भवसायुज्यमागताः ॥ ४५
यैरात्मभूतैर्भगवान्पार्वत्या च महेश्वरः ।
महाभूतगणैर्भुङ्क्ते भूतभव्यभवत्प्रभुः ॥ ४६
नानावादित्रहसितक्ष्वेडितोत्कृष्टगर्जितैः ।
संत्रासयन्तस्ते विश्वमश्वत्थामानमभ्ययुः ॥ ४७
संस्तुवन्तो महादेवं भाः कुर्वाणाः सुवर्चसः ।
विवर्धयिषवो द्रौणेर्महिमानं महात्मनः ॥ ४८
जिज्ञासमानास्तत्तेजः सौप्तिकं च दिदृक्षवः ।
भीमोग्रपरिघालातशूलपट्टसपाणयः ।
घोररूपाः समाजग्मुर्भूतसङ्घाः सहस्रशः ॥ ४९
जनयेयुर्भयं ये स्म त्रैलोक्यस्यापि दर्शनात् ।
न च तान्प्रेक्षमाणोऽपि व्यथामुपजगाम ह ॥५०
अथ द्रौणिर्धनुष्पाणिर्बद्धगोधाङ्गुलित्रवान् ।
स्वयमेवात्मनात्मानमुपहारमुपाहरत् ॥ ५१
धनूंषि समिधस्तत्र पवित्राणि सिताः शराः ।
हविरात्मवतश्चात्मा तस्मिन्भारत कर्मणि ॥ ५२
ततः सौम्येन मन्त्रेण द्रोणपुत्रः प्रतापवान् ।
उपहारं महामन्युरथात्मानमुपाहरत् ॥ ५३
तं रुद्रं रौद्रकर्माणं रौद्रैः कर्मभिरच्युतम् ।
अभिष्टुत्य महात्मानमित्युवाच कृताञ्जलिः ॥५४
द्रौणिरुवाच ।
इममात्मानमद्याहं जातमाङ्गिरसे कुले ।
स्वग्नौ जुहोमि भगवन्प्रतिगृह्णीष्व मां बलिम् ॥ ५५
भवद्भक्त्या महादेव परमेण समाधिना ।
अस्यामापदि विश्वात्मन्नुपाकुर्मि तवाग्रतः ॥ ५६
त्वयि सर्वाणि भूतानि सर्वभूतेषु चासि वै ।
गुणानां हि प्रधानानां कैवल्यं त्वयि तिष्ठति ॥५७
सर्वभूताश्रय विभो हविर्भूतमवस्थितम् ।
प्रतिगृहाण मां देव यद्यशक्याः परे मया ॥ ५८
इत्युक्त्वा द्रौणिरास्थाय तां वेदीं दीप्तपावकाम् ।
संत्यज्यात्मानमारुह्य कृष्णवर्त्मन्युपाविशत् ॥५९
तमूर्ध्वबाहुं निश्चेष्टं दृष्ट्वा हविरुपस्थितम् ।
अब्रवीद्भगवान्साक्षान्महादेवो हसन्निव ॥ ६०
सत्यशौचार्जवत्यागैस्तपसा नियमेन च ।
क्षान्त्या भक्त्या च धृत्या च कर्मणा मनसा गिरा ॥
यथावदहमाराद्धः कृष्णेनाक्लिष्टकर्मणा ।
तस्मादिष्टतमः कृष्णादन्यो मम न विद्यते ॥ ६२
कुर्वता तात संमानं त्वां च जिज्ञासता मया ।
पाञ्चालाः सर्वदा गुप्ता मायाश्च बहुशः कृताः ॥६३
कृतस्तस्यैव संमानः पाञ्चालान्रक्षता मया ।
अभिभूतास्तु कालेन नैषामद्यास्ति जीवितम् ॥६४
एवमुक्त्वा महात्मानं भगवानात्मनस्तनुम् ।
आविवेश ददौ चास्मै विमलं खड्गमुत्तमम् ॥ ६५
अथाविष्टो भगवता भूयो जज्वाल तेजसा ।
वेगवांश्चाभवद्युद्धे देवसृष्टेन तेजसा ॥ ६६
तं दृष्ट्वा तानि भूतानि रक्षांसि च समाद्रवन् ।
अभितः शिबिरं यान्तं द्रोणपुत्रं महारथम् ।
देवदेवं हरं स्थाणुं यान्तं साक्षादिवेश्वरम् ॥ ६७

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः ॥ ८ ॥

शिबिरद्वारे कृपकृतवर्माणौ संस्थाप्यान्तः प्रविष्टेन द्रौणिना धृष्टद्युम्नादिपाञ्चालानां द्रौपदेयादीनां च वधः ॥ १ ॥ भयाद्बहिर्निष्क्रान्तानां कृपकृतवर्मभ्यां वधः ॥ २ ॥

धृतराष्ट्र उवाच ।
तथा प्रयाते शिबिरं द्रोणपुत्रे महारथे ।
कच्चित्कृपश्च भोजश्च भयार्तौ न व्यवर्तताम् ॥ १
कच्चिन्न वारितौ क्षुद्रै रक्षिभिर्नोपलक्षितौ ।
असह्यमिति मन्वानौ न निवृत्तौ महारथौ ॥ २
कच्चिदुन्मथ्य शिबिरं हत्वा सोमकपाण्डवान् ।

सौम्येन सोमदैवत्येन मन्त्रेण ॥ ५३ ॥

सप्तमोऽध्यायः ॥ ७ ॥

'कृता प्रतिज्ञा सफला कच्चित्सञ्जय सा निशि ॥'३
दुर्योधनस्य पदवीं कच्चित्परमिकां रणे ।
'गत्वातिष्ठदसौ द्रौणिः कृत्वा कर्म सुदुष्करम् ॥ ४
धृष्टद्युम्नशिखण्डिभ्यां द्रौपद्याश्च सुतैः किल ।
संछन्ना मेदिनी सुप्तैर्निहतैः पाण्डुसैनिकैः ॥ ५
पाञ्चालैर्वा विनिहतैः शयानै रुधिरोक्षितैः ।
कच्चिन्महीतलं छन्नं तन्ममाचक्ष्व सञ्जय ॥' ६
[पाञ्चालैर्निहतौ वीरौ कच्चित्तु स्वपतां क्षितौ ।
कच्चित्ताभ्यां कृतं कर्म तन्ममाचक्ष्व सञ्जय ॥] ७
सञ्जय उवाच ।
तस्मिन्प्रयाते शिबिरं द्रोणपुत्रे महात्मनि ।
कृपश्च कृतवर्मा च द्रौणिमेवाभ्यवर्तताम् ॥ ८
अश्वत्थामा तु तौ दृष्ट्वा यत्नवन्तौ महारथौ ।
प्रहृष्टः शनकै राजन्निदं वचनमब्रवीत् ॥ ९
यत्तौ भवन्तौ पर्याप्तौ सर्वक्षत्रस्य नाशने ।
किंपुनर्योधशेषस्य प्रसुप्तस्य विशेषतः ॥ १०
अहं प्रवेक्ष्ये शिबिरं चरिष्यामि च कालवत् ।
यथा न कश्चिदपि वां जीवन्मुच्येत मानवः ।
तथा भवद्भ्यां कार्यं स्यादिति मे निश्चिता मतिः ११
इत्युक्त्वा प्राविशद्द्रौणिः पार्थानां शिबिरं महत् ।
अद्वारेणाभ्यवस्कन्द्य विहाय भयमात्मनः ॥ १२
स प्रविश्य महाबाहुरुद्देशज्ञश्च तस्य ह ।
'द्रौणिः परमसंक्रुद्धस्तेजसा प्रज्वलन्निव ।
ततः पर्यचरत्सर्वं संप्रसुप्तं जनं निशि ॥' १३
धृष्टद्युम्नस्य निलयं शनकैरभ्युपागमत् ॥ १४
ते तु कृत्वा महत्कर्म श्रान्ताश्च बलवद्रणे ।
प्रसुप्ता वै सुविश्वस्ताः स्वसैन्यपरिवारिताः ॥ १५
अथ प्रविश्य तद्वेश्म धृष्टद्युम्नस्य भारत ।
पाञ्चाल्यं शयने द्रौणिरपश्यत्सुप्तमन्तिकात् ॥ १६
क्षौमावदाते महति स्पर्द्ध्यास्तरणसंवृते ।
माल्यप्रवरसंयुक्ते धूपैश्चूर्णैश्च वासिते ॥ १७
तं शयानं महात्मानं विस्रब्धमकुतोभयम् ।
अपोथयत पादेन शयनस्थं महीपते ॥ १८
संबुध्य चरणस्पर्शादुत्थाय रणदुर्मदः ।
अभ्यजानादमेयात्मा द्रोणपुत्रं महारथम् ॥ १९
तमुत्पतन्तं शयनादश्वत्थामा महाबलः ।
केशेष्वालभ्य पाणिभ्यां निष्पिपेष महीतले ॥ २०
स बलात्तेन निष्पिष्टः साध्वसेन च भारत ।
अभ्याक्रान्तश्च निद्रान्धो नाशकच्चेष्टितुं तदा ॥२१
'निष्पिष्य तु ततो भूमौ पाञ्चाल्यं द्रौणिरञ्जसा ।
धनुषो ज्यां विमुच्याशु क्रूरबुद्धिरमर्षणः ॥ २२
तस्य कण्ठेऽथ बद्ध्वा तां त्वरितः क्रोधमूर्च्छितः ।'
द्रौणिः क्रूरं मनः कृत्वा पाञ्चाल्यमवधीत्तदा ॥२३
तमाक्रम्य पदा राजन्कण्ठे चोरसि पादयोः ।
नदन्तं विस्फुरन्तं च पशुमारममारयत् ॥ २४
'स वार्यमाणस्तरसा बलाद्बलवता बली ।'
तुदन्नखैस्तु स द्रौणिं नातिव्यक्तमुदाहरत् ॥ २५
आचार्यपुत्र शस्त्रेण जहि मां मा चिरं कृथाः ।
त्वत्कृते सुकृतां लोकान्गच्छेयं द्विपदांवर ॥ २६
एवमुक्त्वा तु वचनं विरराम परंतपः ।
सुतः पाञ्चालराजस्य आक्रान्तो बलिना भृशम् २७
तस्याव्यक्तां तु तां वाचं संश्रुत्य द्रौणिरब्रवीत् ।
आचार्यघातिनां लोका न सन्ति कुलपांसन ।
तस्माच्छस्त्रेण निधनं न त्वमर्हसि दुर्मते ॥ २८
'नृशंसेनातिवृत्तेन त्वया मे निहतः पिता ।
तस्मात्त्वमपि वध्यश्च नृशंसेन नृशंसकृत् ॥' २९
एवं ब्रुवाणस्तं वीरं सिंहो मत्तमिव द्विपम् ।
मर्मस्वभ्यवधीत्क्रुद्धः पादघातैः सुदारुणैः ॥ ३०
तस्य वीरस्य शब्देन मार्यमाणस्य वेश्मनि ।
अबुध्यन्त महाराज स्त्रियो ये चास्य रक्षिणः ॥३१
ते दृष्ट्वा धर्षयन्तं तमतिमानुषविक्रमम् ।
भूतमित्यध्यवस्यन्तो न स्म प्रव्याहरन्भयात् ॥३२
तं तु तेनाभ्युपायेन गमयित्वा यमक्षयम् ।
अध्यतिष्ठत तेजस्वी रथं प्राप्य सुदर्शनम् ॥ ३३

पाञ्चालैः पूर्वं निहतौ सन्तौ स्वपतां कच्चित् कोपात् स्वपतां पाञ्चालानां कर्म वधाख्यं ताभ्यां कच्चित्कृतमिति सम्बन्धः ॥ ७ ॥ शिबिरद्वार्यतिष्ठतामिति झ. पाठः ॥ ८ ॥ वां युवां प्राप्येति शेषः ॥ ११ ॥ उद्देशज्ञः धृष्टद्युम्नस्थलज्ञः ॥ १३ ॥ पादाष्ठीलैरिति झ. पाठः । तत्र पादाष्ठीलैः पादग्रन्थिभिः । पार्ष्णिघातैरित्यर्थः ॥ ३० ॥

स तस्य भवनाद्राजन्निष्क्रम्यानादयन्दिशः ।
रथेन शिबिरं प्रायाज्जिघांसुर्द्विषतो बली ॥ ३४
अपक्रान्ते ततस्तस्मिन्द्रोणपुत्रे महारथे ।
सहितै रक्षिभिः सर्वैः प्रणेदुर्योषितस्तदा ॥ ३५
राजानं निहतं दृष्ट्वा भृशं शोकपरायणाः ।
व्याक्रोशन्क्षत्रियाः सर्वे धृष्टद्युम्नस्य भारत ॥ ३६
तासां तु तेन शब्देन समीपे क्षत्रियर्षभाः ।
संभ्रान्ताः समनह्यन्त किमेतदिति चाब्रुवन् ॥ ३७
स्त्रियस्तु राजन्वित्रस्ता भारद्वाजं निरीक्ष्य ताः ।
अब्रुवन्दीनकण्ठेन क्षिप्रमाद्रवतेति वै ॥ ३८
राक्षसो वा मनुष्यो वा नैनं जानीम कोन्वयम् ।
हत्वा पाञ्चालराजानं रथमारुह्य तिष्ठति ॥ ३९
ततस्ते योधमुख्यास्तं सहसा पर्यवारयन् ।
स तानापततः सर्वान्रुद्रास्त्रेण व्यपोथयत् ॥ ४०
धृष्टद्युम्नं च हत्वा स तांश्चैवास्य पदानुगान् ।
अपश्यच्छयने सुप्तमुत्तमौजसमन्तिके ॥ ४१
तमप्याक्रम्य पादेन कण्ठे चोरसि तेजसा ।
तथैव मारयामास विनर्दन्तमरिंदमम् ॥ ४२
युधामन्युश्च विक्रान्तो मत्वा तं राक्षसं स सः ।
गदामुद्यम्य वेगेन हृदि द्रौणिमताडयत् ॥ ४३
'गदाप्रहाराभिहतो नाचलद्द्रौणिराहवे ।'
तमभिद्रुत्य वेगेन क्षितौ चैनमपातयत् ॥ ४४
विस्फुरन्तं च पशुवत्तथैवैनममारयत् ।
तथा स वीरो हत्वा तं ततोऽन्यान्समुपाद्रवत् ॥ ४५
संसुप्तानेव राजेन्द्र तत्र तत्र महारथान् ।
पाञ्चालवीरानाक्रम्य क्रुद्धो न्यहनदन्तिके ।
स्फुरतो वेपमानांश्च शमितेव पशून्मखे ॥ ४६
ततो निस्त्रिंशमादाय जघानान्यान्पृथक्पृथक् ।
भागशो विचरन्मार्गानसियुद्धविशारदः ॥ ४७
तथैव गुल्मे संप्रेक्ष्य शयानान्मध्यगौल्मिकान् ।
श्रान्तान्व्यस्तायुधान्सर्वानसिनैव व्यपोथयत् ॥ ४८
योधानश्वान्द्विपांश्चैव प्राच्छिनत्स वरासिना ।
रुधिरोक्षितसर्वाङ्गः कालसृष्ट इवान्तकः ॥ ४९
विस्फुरद्भिश्च तैर्द्रौणिर्निस्त्रिंशस्योद्यमेन च ।
अवक्षेपेण चैवासेस्त्रिधा रक्तोक्षितोऽभवत् ॥ ५०
तस्य लोहितरक्तस्य दीप्तखड्गस्य युध्यतः ।
अमानुष इवाकारो बभौ परमभीषणः ॥ ५१
ये त्वजाग्रन्त कौरव्य तेऽपि शब्देन मोहिताः ।
वीक्षमाणास्तु ते तत्र द्रौणिं दृष्ट्वा प्रविव्यथुः ॥ ५२
तद्रूपं तस्य ते दृष्ट्वा क्षत्रियाः शत्रुकर्शनम् ।
राक्षसं मन्यमानास्तं नयनानि न्यमीलयन् ॥ ५३
स घोररूपो व्यचरत्कालवच्छिबिरे तदा ।
अपश्यद्द्रौपदीपुत्रानवशिष्टांश्च सोमकान् ॥ ५४
तेन शब्देन वित्रस्ता धनुर्हस्ता महारथाः ।
धृष्टद्युम्नं हतं श्रुत्वा द्रौपदेया विशांपते ।
अवाकिरञ्शरव्रातैर्भारद्वाजमभीतवत् ॥ ५५
ततस्तेन निनादेन संप्रबुद्धाः प्रभद्रकाः ।
शिलीमुखैः शिखण्डी च द्रोणपुत्रं समार्दयन् ॥ ५६
भारद्वाजः स तान्दृष्ट्वा शरवर्षाणि वर्षतः ।
ननाद बलवन्नादं जिघांसुस्तान्महारथान् ॥ ५७
ततः परमसंक्रुद्धः पितुर्वधमनुस्मरन् ।
अवरुह्य रथोपस्थात्त्वरमाणोऽभिदुद्रुवे ॥ ५८
सहस्रचन्द्रविमलं गृहीत्वा चर्म संयुगे ।
खड्गं च विमलं दिव्यं जातरूपपरिष्कृतम् ।
द्रौपदेयानभिद्रुत्य खड्गेन व्यधमद्बली ॥ ५९
ततः स नरशार्दूलः प्रतिविन्ध्यं महाहवे ।
कुक्षिदेशेऽवधीद्राजन्स हतो न्यपतद्भुवि ॥ ६०
प्रासेन विद्ध्वा द्रौणिं तु सुतसोमः प्रतापवान् ।
पुनश्चासिं समुद्यम्य द्रोणपुत्रमुपाद्रवत् ॥ ६१
सुतसोमस्य सासिं तं बाहुं छित्त्वा नरर्षभ ।
पुनरप्याहनत्पार्श्वे स भिन्नहृदयोऽपतत् ॥ ६२
नाकुलिस्तु शतानीको रथचक्रेण वीर्यवान् ।
दोर्भ्यामुत्क्षिप्य वेगेन वक्षस्येनमताडयत् ॥ ६३
अताडयच्छतानीकं मुक्तचक्रं द्विजस्तु सः ।
स विह्वलो ययौ भूमिं ततोऽस्यापाहरच्छिरः ॥ ६४
श्रुतकर्मा तु परिघं घोरं गृह्य दुरासदम् ।

तैश्छिन्नगात्रैर्विस्फुरद्भिस्तेषां शरीराद्रुच्चलद्भी रक्तबिन्दुभिरि- त्यर्थः ॥ ५० ॥

अताडयत्समुद्यम्य वेगेन द्रौणिमुत्स्मयन् ॥ ६५
स तु तं श्रुतकर्माणमास्ये जघ्ने वरासिना ।
स हतो न्यपतद्भूमौ विमूर्धा विकृताननः ॥ ६६
तेन शब्देन वीरस्तु श्रुतकीर्तिरबुध्यत ।
अश्वत्थामानमासाद्य शरवर्षैरवाकिरत् ॥ ६७
'शरैराच्छादितस्तेन द्रोणपुत्रो महारथः ।
अदृश्यत महाराज श्वाविच्छललतो यथा ॥' ६८
तस्यापि शरवर्षाणि चर्मणा प्रतिवार्य सः ।
सकुण्डलं शिरः कायाद्भ्राजमानमपाहरत् ॥ ६९
ततो भीष्मनिहन्तारं सह सर्वैः प्रभद्रकैः ।
आहनत्सर्वतो वीरं नानाप्रहरणैर्बलात् ॥ ७०
शिलीमुखेन चाप्येनं भ्रुवोर्मध्ये समार्पयत् ॥ ७१
स तु क्रोधसमाविष्टो द्रोणपुत्रो महाबलः ।
शिखण्डिनं समासाद्य द्विधा चिच्छेद सोऽसिना ७२
शिखण्डिनं ततो हत्वा क्रोधाविष्टः परंतपः ।
प्रभद्रकगणान्सर्वानभिदुद्राव वेगवान् ॥ ७३
यच्च शिष्टं विराटस्य बलं तु भृशमाद्रवत् ।
द्रुपदस्य च पुत्राणां पौत्राणां सुहृदामपि ।
चकार कदनं घोरं दृष्ट्वा तत्र महाबलः ॥ ७४
अन्यानन्यांश्च पुरुषानभिसृत्याभिसृत्य च ।
न्यकृन्तदसिना द्रौणिरसिमार्गविशारदः ॥ ७५
कालीं रक्तास्यनयनां रक्तमाल्यानुलेपनाम् ।
रक्ताम्बरधरां घोरां पाशहस्तां कुटुम्बिनीम् ॥ ७६
ददृशुः कालरात्रिं ते स्मयमानामिव स्थिताम् ।
नराश्वकुञ्जरान्पाशैर्बद्ध्वा घोरैः प्रतस्थुषीम् ॥ ७७
वहन्तीं विविधान्प्रेतान्पाशबद्धान्विमूर्धजान् ।
तथैव च सदा राजन्न्यस्तशस्त्रान्महारथान् ॥ ७८
स्वप्ने सुप्तान्नयन्तीं तां रात्रिष्वन्यासु मारिष ।
ददृशुर्योधमुख्यास्ते घ्नन्तं द्रौणिं च नित्यदा ॥ ७९
यतः प्रभृति संग्रामः कुरुपाण्डवसेनयोः ।
ततः प्रभृति तां कन्यामपश्यन्द्रौणिमेव च ॥ ८०
तांस्तु दैवहतान्पूर्वं पश्चाद्द्रौणिर्व्यपातयत् ।
त्रासयन्सर्वभूतानि विनदन्भैरवान्रवान् ॥ ८१
तदनुस्मृत्य ते वीरा दर्शनं पूर्वकालिकम् ।
इदं तदित्यमन्यन्त दैवेनोपनिपीडिताः ॥ ८२
ततस्तेन निनादेन प्रत्यबुध्यन्त धन्विनः ।
शिबिरे पाण्डवेयानां शतशोऽथ सहस्रशः ॥ ८३
सोऽच्छिनत्कस्यचित्पादौ जघनं चैव कस्यचित् ।
कांश्चिद्बिभेद पार्श्वेषु कालसृष्ट इवान्तकः ॥ ८४
अत्युग्रप्रतिपिष्टैश्च नदद्भिश्च भृशोत्कटैः ।
गजाश्वमथितैश्चान्यैर्मही कीर्णाऽभवत्प्रभो ॥ ८५
क्रोशतां किमिदं कोऽयं कः शब्दः किंनु किं कृतम् ।
पाञ्चालानां तथा द्रौणिरन्तकः समपद्यत ॥ ८६
अपेतशस्त्रसन्नाहान्सन्नद्धान्पाण्डुसृञ्जयान् ।
प्राहिणोन्मृत्युलोकाय द्रौणिः प्रहरतां वरः ॥ ८७
ततस्तच्छस्त्रवित्रस्ता भयादभ्यपतन्नराः ।
निद्रान्धा नष्टसंज्ञाश्च तत्रतत्र निपेतिरे ॥ ८८
ऊरुस्तम्भगृहीताश्च कश्मलाभिहतौजसः ।
विनदन्तो भृशं त्रस्ता निरैक्षन्त परस्परम् ॥ ८९
ततो रथं पुनर्द्रौणिरास्थितो भीमदर्शनः ।
धनुष्पाणिः शरैरन्यान्प्रैषयद्वै यमक्षयम् ॥ ९०
पुनरुत्पततश्चापि दूरादपि नरोत्तमान् ।
शूरान्संपततश्चान्यान्कालरात्र्यै न्यवेदयत् ॥ ९१
तथैव स्यन्दनाग्रेण प्रमथन्स व्यरोचत ।
शरवर्षैश्च विविधैरवर्षच्छात्रवांस्ततः ॥ ९२
पुनश्च सुविचित्रेण शतचन्द्रेण चर्मणा ।
तेन चाकाशवर्णेन तथाचरत सोऽसिना ॥ ९३
तथा स शिबिरं तेषां द्रौणिराहवदुर्मदः ।
व्यक्षोभयत राजेन्द्र महाह्रदमिव द्विपः ॥ ९४
उत्पेतुस्तेन शब्देन योधा राजन्विचेतसः ।
निद्रार्ताश्च भयार्ताश्च व्यधावन्त ततस्ततः ॥ ९५
विस्वरं चुक्रुशुश्चान्ये बह्वबद्धं तथाऽवदन् ।
न च स्म प्रत्यपद्यन्त शस्त्राणि वसनानि च ॥ ९६
विमुक्तकेशाश्चाप्यन्ये नाभ्यजानन्परस्परम् ।
उत्पतन्तोऽपतञ्श्रान्ताः केचित्तत्राभ्रमंस्तदा ।
पुरीषमसृजन्केचित्केचिन्मूत्रं प्रसुस्रुवुः ॥ ९७

पाण्डुसृञ्जयान् पाण्डवसंबन्धिनः सृञ्जयान् । पाण्डोर्गोत्रापत्यानि सृञ्जयाश्च तान्वा ॥ ८७ ॥

बन्धनानि च राजेन्द्र संछिद्य तुरगा द्विपाः ।
समं पर्यपतंश्चान्ये कुर्वन्तो महदाकुलम् ॥ ९८
तत्र केचिन्नरा भीता व्यलीयन्त महीतले ।
तथैव तान्निपतितानपिंषन्गजवाजिनः ॥ ९९
तस्मिंस्तथा वर्तमाने रक्षांसि पुरुषर्षभ ।
हृष्टानि व्यनदन्नुच्चैर्मुदा युक्तानि सत्तम ॥ १००
स शब्दः प्रेरितो राजन्भूतसङ्घैर्मुदा युतैः ।
अपूरयद्दिशः सर्वा दिवं चातिमहान्स्वनः ॥ १०१
तेषामार्तरवं श्रुत्वा वित्रस्ता गजवाजिनः ।
मुक्ताः पर्यपतन्राजन्मृद्नन्तः शिबिरे जनम् ॥ १०२
तैस्तत्र परिधावद्भिश्चरणोदीरितं रजः ।
अकरोच्छिबिरे तेषां रजन्यां द्विगुणं तमः ॥ १०३
तस्मिंस्तमसि संजाते प्रमूढाः सर्वतो जनाः ।
नाजानन्पितरः पुत्रान्भ्रातॄन्भ्रातर एव च ॥ १०४
गजो गजानतिक्रम्य निर्मनुष्या हया हयान् ।
अताडयंस्तथाऽभञ्जंस्तथाऽमृद्नंश्च भारत ॥ १०५
ते भग्नाः प्रपतन्ति स्म मृद्नन्तश्च परस्परम् ।
न्यपातयंस्तथा चान्यान्पातयित्वा तदाऽपिषन् ॥
विचेतसः सनिद्राश्च तमसा चावृता नराः ।
जघ्नुः स्वानेव तत्राथ कालेनैव प्रचोदिताः ॥ १०७
त्यक्त्वाद्वाराणि च द्वास्थास्तथागुल्मानिगौल्मिकाः
प्राद्रवन्त यथाशक्ति कांदिशीका विचेतसः ॥१०८
विप्रनष्टाश्च तेऽन्योन्यं नाजानन्तस्तथा विभो ।
क्रोशन्तस्तात पुत्रेति दैवोपहतचेतसः ॥ १०९
पलायतां दिशस्तेषां स्वानप्युत्सृज्य बान्धवान् ।
गोत्रनामभिरन्योन्यमाक्रन्दन्त ततो जनाः ॥११०
हाहाकारं च कुर्वाणाः पृथिव्यां शेरते परे ।
तान्बुद्ध्वा रणमध्येऽसौ द्रोणपुत्रो व्यपोथयत् १११
तत्रापरे वध्यमाना मुहुर्मुहुरचेतसः ।
शिबिरान्निष्पतन्ति स्म क्षत्रिया भयपीडिताः ११२
तांस्तु निष्पतितांस्त्रस्ताञ्शिबिराज्जीवितैषिणः ।
कृतवर्मा कृपश्चैव द्वारदेशे निजघ्नतुः ॥ ११३
विस्रस्तयन्त्रकवचान्मुक्तकेशान्कृताञ्जलीन् ।
वेपमानान्क्षितौ भीतान्नैव कांश्चिदमुच्यताम् ११४
नामुच्यत तयोः कश्चिन्निष्क्रान्तः शिबिराद्बहिः ॥
कृपश्चैव महाराज हार्दिक्यश्चैव दुर्मतिः ।
भूयश्चैव चिकीर्षन्तौ द्रोणपुत्रस्य तौ प्रियम् ।
त्रिषु देशेषु ददतुः शिबिरस्य हुताशनम् ॥ ११६
ततः प्रकाशे शिबिरे खड्गेन पितृनन्दनः ।
अश्वत्थामा महाराज व्यचरत्कृतहस्तवत् ॥ ११७
कांश्चिदापततो वीरानपरांश्चैव धावतः ।
व्ययोजयत खड्गेन प्राणैर्द्विजवरोत्तमः ॥ ११८
कांश्चिद्योधान्स खड्गेन मध्ये संछिद्य वीर्यवान् ।
अशातयद्द्रोणपुत्रः संरब्धस्तिलकाण्डवत् ॥ ११९
निनदद्भिर्भृशायस्तैर्नराश्वद्विरदोत्तमैः ।
पतितैरभवत्कीर्णा मेदिनी भरतर्षभ ॥ १२०
मानुषाणां सहस्रेषु हतेषु पतितेषु च ।
उदतिष्ठन्कबन्धानि बहून्युत्थाय चापतन् ॥ १२१
सायुधान्साङ्गदान्बाहून्विचकर्त शिरांसि च ।
हस्तिहस्तोपमानूरून्हस्तान्पादांश्च भारत ॥ १२२
पृष्ठच्छिन्नान्पार्श्वच्छिन्नाञ्शिरश्छिन्नांस्तथापरान् ।
स महात्माकरोद्द्रौणिः कांश्चिचापि पराङ्मुखान् ॥
मध्यदेशे नरानन्यांश्चिच्छेदान्यांश्च कर्णतः ।
अंसदेशे निहत्यान्यान्काये प्रावेशयच्छिरः॥ १२४
एवं हि बहुभिः शस्त्रैर्घ्नतोऽपि बलवत्तरान् ।
तमसा रजनी घोरा बभौ दारुणदर्शना ॥ १२५
किंचित्प्राणैश्च पुरुषैर्हतैश्चान्यैः सहस्रशः ।
बहुना च गजाश्वेन भूरभूद्भीमदर्शना ॥ १२६
यक्षरक्षःसमाकीर्णे रथाश्वद्विपदारुणे ।
क्रुद्धेन द्रोणपुत्रेण संछिन्नाः प्रापतन्भुवि ।
भ्रातॄनन्ये पितॄनन्ये पुत्रानन्ये विचुक्रुशुः ॥१२७
केचिदूचुर्न तत्क्रुद्धैर्धार्तराष्ट्रैः कृतं रणे ।
यत्कृतं नः प्रसुप्तानां रक्षोभिः क्रूरकर्मभिः ।
असान्निध्याद्धि पार्थानामिदं वः कदनं कृतम् १२८
न चासुरैर्न गन्धर्वैर्न यक्षैर्न च राक्षसैः ।
शक्यो विजेतुं कौन्तेयो नेता यस्य जनार्दनः ।

अभञ्जन् गात्राण्यनमयन् । अमृद्नन् परस्परं मर्दितवन्तः ॥ १०५ ॥ अपिषन् अपिंषन् ॥ १०६ ॥

ब्रह्मण्यः सत्यवाग्दान्तः सर्वभूतानुकम्पकः ॥१२९
न च सुप्तं प्रमत्तं वा न्यस्तशस्त्रं कृताञ्जलिम् ।
धावन्तं मुक्तकेशं वा हन्ति पार्थो धनञ्जयः ॥१३०
तदिदं नः कृतं घोरं रक्षोभिः क्रूरकर्मभिः ।
इति लालप्यमानाः स्म शेरते बहवो जनाः ॥१३१
स्तनतां च मनुष्याणामपरेषां च कूजताम् ।
ततो मुहूर्तात्प्राशाम्यत्स शब्दस्तुमुलो महान् १३२
शोणितव्यतिषिक्तायां वसुधायां च भूमिप ।
तद्रजस्तुमुलं घोरं क्षणेनान्तरधीयत ॥ १३३
स चेष्टमानानुद्विग्नान्निरुत्साहान्सहस्रशः ।
न्यपातयन्नरान्क्रुद्धः पशून्पशुपतिर्यथा ॥ १३४
अन्योन्यं संपरिष्वज्य शयानाञ्जीवतोऽपरान् ।
संलीनान्युध्यमानांश्च सर्वान्द्रौणिरपोथयत् ॥१३५
दह्यमाना हुताशेन वध्यमानाश्च तेन ते ।
परस्परं तदा योधाननयद्यमसादनम् ॥ १३६
तस्या रजन्यास्त्वर्धेन पाण्डवानां महद्बलम् ।
गमयामास राजेन्द्र द्रौणिर्यमनिवेशनम् ॥ १३७
निशाचराणां सत्वानां रात्रिः सा हर्षवर्धिनी ।
आसीन्नरगजाश्वानां रौद्री क्षयकरी भृशम् ॥१३८
तत्रादृश्यन्त रक्षांसि पिशाचाश्च पृथग्विधाः ।
खादन्तो नरमांसानि पिबन्तः शोणितानि च१३९
करालाः पिङ्गला रौद्राः शैलदन्ता रजस्वलाः ।
जटिला भीमवक्त्राश्च पञ्चपादा महोदराः ॥१४०
पश्चादङ्गुलयो रूक्षा विरूपा भैरवस्वनाः ।
गजाननाश्च ह्रस्वाश्च नीलवर्णा बिभीषणाः ॥१४१
सपुत्रदाराः सुक्रूराः सुदुर्दर्शाः सुनिर्घृणाः ।
विविधानि च रूपाणि तत्रादृश्यन्त रक्षसाम् १४२
पीत्वा च शोणितं हृष्टाः प्रानृत्यन्गणशोऽपरे ।
इदं परमिदं मेध्यमिदं स्वाद्विति चाब्रुवन् ॥ १४३
मेदोमज्जास्थिरक्तानां मांसानां च भृशाशिताः ।
परे मांसानि खादन्तः क्रव्यादा मांसजीविनः१४४
वसाश्चैवापरे पीत्वा पर्यधावन्विकुक्षिकाः ।
नानावक्त्रास्तथा रौद्राः क्रव्यादाः पिशिताशनाः ॥
अयुतानि च तत्रासन्प्रयुतान्यर्बुदानि च ।
रक्षसां घोररूपाणां महतां क्रूरकर्मणाम् ॥ १४६
मुदितानां वितृप्तानां तस्मिन्महति वैशसे ।
समेतानि बहून्यासन्भूतानि च जनाधिप ॥ १४७
एवंविधा हि सा रात्रिः सोमकानां जनक्षये ।
प्रसुप्तानां प्रमत्तानामासीत्सुभृशदारुणा ॥ १४८
असंशयं हि कालस्य पर्यायो दुरतिक्रमः ।
तादृशा निहता यत्र कृत्वाऽस्माकं जनक्षयम् ॥१४९

धृतराष्ट्र उवाच ।

प्रागेव सुमहत्कर्म द्रौणिरेतन्महारथः ।
नाकरोदीदृशं कस्मान्मत्पुत्रविजये धृतः ॥ १५०
अथ कस्माद्धते क्षत्रे कर्मेदं कृतवानसौ ।
द्रोणपुत्रो महात्मा स तन्मे शंसितुमर्हसि ॥ १५१

सञ्जय उवाच ।

तेषां नूनं भयान्नासौ कृतवान्कुरुनन्दन ।
असान्निध्याद्धि पार्थानां केशवस्य च धीमतः ।
सात्यकेश्चापि कर्मेदं द्रोणपुत्रेण साधितम् ॥ १५२
को हि तेषां समक्षं तान्हन्यादपि मरुत्पतिः ।
एतदीदृशकं वृत्तं राजन्सुप्तजने विभो ॥ १५३
ततो जनक्षयं कृत्वा पाण्डवानां महात्ययम् ।
प्रत्यूषकाले शिबिरात्प्रतिगन्तुमियेष सः ॥ १५४
नृशोणितावसिक्तस्य द्रौणेरासीदसित्सरुः ।
पाणिना सह संश्लिष्ट एकीभूत इव प्रभो ॥ १५५
स निःशेषानरीन्कृत्वा विरराम निशाक्षये ।
युगान्ते सर्वभूतानि भस्म कृत्वेव पावकः ॥१५६
यथाप्रतिज्ञं तत्कर्म कृत्वा द्रौणायनिः प्रभो ।
दुर्गमां पदवीं गच्छन्पितुरासीद्गतज्वरः ॥ १५७
यथैव संसुप्तजने शिबिरे प्राविशन्निशि ।
तथैव हत्वा निःशब्दो निश्चक्राम नरर्षभः ॥ १५८
निष्क्रम्य शिबिरात्तस्मात्ताभ्यां संगम्य वीर्यवान् ।
आचख्यौ कर्म तत्सर्वं हृष्टः संहर्षयन्विभो ॥ १५९
तावथाचख्यतुस्तस्मै प्रियं प्रियकरौ तदा ।
पाञ्चालान्सृञ्जयांश्चैव विनिकृत्तान्सहस्रशः ॥१६०

भृशाशिताः भृशं संतर्पिताः ॥१४४॥ विकुक्षिकाः विपुलकुक्षयः ॥ १४५ ॥ अष्टमोऽध्यायः ॥ ८ ॥

प्रीत्या चोच्चैरुदक्रोशंस्तथैवास्फोटयंस्तलान् ।
दिष्ट्यादिष्ट्येति चान्योन्यं समेत्योचुर्महारथाः॥१६१
पर्यष्वजत्ततो द्रौणिस्ताभ्यां संप्रतिनन्दितः ।
इदं हर्षात्तु सुमहदाददे वाक्यमुत्तमम् ॥ १६२
पाञ्चाला निहताः सर्वे द्रौपदेयाश्च सर्वशः ।
सोमका मत्स्यशेषाश्च सर्वे विनिहता मया ॥ १६३
इदानीं कृतकृत्याः स्म याम तत्रैव मा चिरम् ।
यदि जीवति नो राजा तस्मै शंसामहे प्रियम्॥१६४

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि अष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः ॥ ९ ॥

द्रौणिकृपकृतवर्मभिर्दुर्योधनमेत्य शोचनम् ॥ १ ॥ दुर्योधनंप्रति द्रौणिना सुप्तजनवधकथनम् ॥ २ ॥ दुर्योधनेन प्राणत्यागः ॥ ३ ॥ द्रौण्यादीनां नगरगमनम् ॥ ४ ॥ सञ्जयस्य व्यासानुग्रहप्राप्तदिव्यज्ञाननाशः ॥ ५ ॥

सञ्जय उवाच ।
ते हत्वा सर्वपाञ्चालान्द्रौपदेयांश्च सर्वशः ।
आगच्छन्सहितास्तत्र यत्र दुर्योधनो हतः ॥ १
गत्वा चैनमपश्यन्त किंचित्प्राणं जनाधिपम् ।
ततो रथेभ्यः प्रस्कन्द्य परिवव्रुस्तवात्मजम् ॥ २
तं भग्नसक्थं राजेन्द्र कृच्छ्रप्राणमचेतसम् ।
वमन्तं रुधिरं वक्त्रादपश्यन्वसुधातले ॥ ३
वृतं समन्ताद्बहुभिः श्वापदैर्घोरदर्शनैः ।
सालावृकगणैश्चैव भक्षयिष्यद्भिरन्तिकात् ॥ ४
निवारयन्तं कृच्छ्रात्ताञ्श्वापदांश्च चिखादिषून् ।
विवेष्टमानमूरुभ्यां सुभृशं गाढवेदनम् ॥ ५
तं शयानं तथा दृष्ट्वा भूमौ सुरुधिरोक्षितम् ।
हतशिष्टास्त्रयो वीराः शोकार्ताः पर्यदेवयन् ।
अश्वत्थामा कृपश्चैव कृतवर्मा च सात्वतः ॥ ६
तैस्त्रिभिः शोणितादिग्धैर्निःश्वसद्भिर्महारथैः ।
शुशुभे स वृतो राजा वेदी त्रिभिरिवाग्निभिः ॥ ७
ते तं शयानं संप्रेक्ष्य राजानमतथोचितम् ।
अविषह्येन दुःखेन ततस्ते रुरुदुस्त्रयः ॥ ८
ततस्तु रुधिरं हस्तैर्मुखान्निर्मृज्य तस्य हि ।
रणे राज्ञः शयानस्य कृपः संपर्यदेवयत् ॥ ९
कृप उवाच ।
न दैवस्यातिभारोऽस्ति यदयं रुधिरोक्षितः ।
एकादशचमूभर्ता शेते दुर्योधनो हतः ॥ १०
पश्य चामीकराभस्य चामीकरविभूषिताम् ।
गदां गदाप्रियस्येमां समीपे पतितां भुवि ॥ ११
इयमेनं गदा शूरं न जहाति रणेरणे ।
स्वर्गायापि व्रजन्तं हि न जहाति यशस्विनम्॥१२
पश्येमां सह वीरेण जाम्बूनदविभूषिताम् ।
शयानां शयने हर्म्ये भार्यां प्रीतिमतीमिव ॥ १३
योऽयं मूर्धाभिषिक्तानामग्रे याति परंतपः ।
स हतो ग्रसते पांसून्पश्य कालस्य पर्ययम् ॥ १४
येनाजौ निहता भूमौ शेरते क्षत्रियर्षभाः ।
स भूमौ निहतः शेते कुरुराजः परैरयम् ॥ १५
भयान्नमन्ति राजानो यस्य स्म शतसङ्घशः ।
स वीरशयने शेते क्रव्याद्भिः परिवारितः ॥ १६
यमुपासन्नृपाः पूर्वमर्थहेतोर्महीपतिम् ।
उपासते च तं ह्यद्य क्रव्यादा मांसगृद्धिनः ॥ १७
सञ्जय उवाच ।
तं शयानं कुरुश्रेष्ठं ततो भरतसत्तमम् ।
अश्वत्थामा समालिङ्ग्य करुणं पर्यदेवयत् ॥ १८
आहुस्त्वां राजशार्दूल मुख्यं सर्वधनुष्मताम् ।
धनाध्यक्षोपमं युद्धे शिष्यं संकर्षणस्य च ॥ १९
कथं विवरमद्राक्षीद्भीमसेनस्तवानघ ।
बलिनं कृतिनो नित्यं स च पापात्मवान्नृप ॥२०
कालो नूनं महाराज लोकेऽस्मिन्बलवत्तरः ।
पश्यामो निहतं त्वां च भीमसेनेन संयुगे ॥ २१
कथं त्वां सर्वधर्मज्ञं क्षुद्रः पापो वृकोदरः ।

उपासत द्विजाः पूर्वमर्थहेतोर्यमीश्वरमिति झ॰ पाठः ॥ १७ ॥

निकृत्या हतवान्मन्दो नूनं कालो दुरत्ययः ॥ २२
द्वन्द्वयुद्धे ह्यधर्मेण समाहूयौजसा मृधे ।
गदया भीमसेनेन निर्भग्ने सक्थिनी तव ॥ २३
अधर्मेण हतस्याजौ मृद्यमानं पदा शिरः ।
य उपेक्षितवान्क्षुद्रं धिक्तमस्तु युधिष्ठिरम् ॥ २४
युद्धेष्वपवदिष्यन्ति योधा नूनं वृकोदरम् ।
यावत्स्थास्यन्ति भूतानि निकृत्या ह्यसि पातितः॥
ननु रामोऽब्रवीद्राजंस्त्वां सदा यदुनन्दनः ।
दुर्योधनसमो नास्ति गदायामिति वीर्यवान् ॥ २६
श्लाघते त्वां हि वार्ष्णेयो राजन्संसत्सु भारत ।
स शिष्यो मम कौरव्यो गदायुद्ध इति प्रभो ॥ २७
यां गतिं क्षत्रियस्याहुः प्रशस्तां परमर्षयः ।
हतस्याभिमुखस्याजौ प्राप्तस्त्वमसि तां गतिम् ॥ २८
दुर्योधन न शोचामि त्वामहं पुरुषर्षभ ।
हतपुत्रौ तु शोचामि गान्धारीं पितरं च ते ॥ २९
द्वावनाथौ कृतौ वीर त्वया नाथेन वर्धितौ ।
भिक्षुकौ विचरिष्येते शोचन्तौ पृथिवीमिमाम् ॥ ३०
धिगस्तु कृष्णं वार्ष्णेयमर्जुनं चापि दुर्मतिम् ।
धर्मज्ञमानिनौ यौ त्वां वध्यमानमुपेक्षताम् ॥ ३१
पाण्डवाश्चापि ते सर्वे किं वक्ष्यन्ति नराधिप ।
कथं दुर्योधनोऽस्माभिर्हत इत्यनपत्रपाः ॥ ३२
धन्यस्त्वमसि गान्धारे यस्त्वमायोधने हतः ।
प्रयातोऽभिमुखः शत्रून्धर्मेण पुरुषर्षभ ॥ ३३
हतपुत्रा हि गान्धारी निहतज्ञातिबान्धवा ।
प्रज्ञाचक्षुश्च दुर्धर्षः कां दशां प्रतिपत्स्यते ॥ ३४
धिगस्तु कृतवर्माणं मां कृपं च महारथम् ।
ये वयं न गताः स्वर्गं त्वां पुरस्कृत्य पार्थिवम् ॥ ३५
दातारं सर्वकामानां रक्षितारं प्रजाहितम् ।
यद्वयं नानुगच्छाम त्वां धिगस्मान्नराधमान् ॥ ३६
कृपस्य तव वीर्येण मम चैव पितुश्च मे ।
सभृत्यानां नरव्याघ्र रत्नवन्ति गृहाणि च ॥ ३७
तव प्रसादादस्माभिः समित्रैः सह बान्धवैः ।
अवाप्ताः क्रतवो मुख्या बहवो भूरिदक्षिणाः ॥ ३८
कुतश्चापीदृशं पापाः प्रवर्तिष्यामहे वयम् ।
यादृशेन पुरस्कृत्य त्वं गतः सर्वपार्थिवान् ॥ ३९
वयमेव त्रयो राजन्गच्छन्तं परमां गतिम् ।
यद्वै त्वां नानुगच्छामस्तेन तप्स्यामहे वयम् ॥ ४०
तत्स्वर्गहीना हीनार्थाः स्मरन्तः सुकृतस्य ते ।
किं नाम तद्भवेत्कर्म येन त्वां न व्रजाम वै ॥ ४१
दुःखं नूनं कुरुश्रेष्ठ चरिष्याम महीमिमाम् ।
हीनानां नस्त्वया राजन्कुतः शान्तिः कुतः सुखं ४२
गत्वैव तु महाराज समेत्य च महारथान् ।
यथाज्येष्ठं यथाश्रेष्ठं पूजयेर्वचनान्मम ॥ ४३
आचार्यं पूजयित्वा च केतुं सर्वधनुष्मताम् ।
हतं मयाऽद्य शंसेथा धृष्टद्युम्नं नराधिप ॥ ४४
परिष्वजेथा राजानं बाह्लिकं सुमहारथम् ।
सैन्धवं सोमदत्तं च भूरिश्रवसमेव च ॥ ४५
तथा पूर्वगतानन्यान्स्वर्गे पार्थिवसत्तमान् ।
अस्मद्वाक्यात्परिष्वज्य संपृच्छेस्त्वमनामयम् ॥ ४६
सञ्जय उवाच ।
इत्येवमुक्त्वा राजानं भग्नसक्थमचेतसम् ।
अश्वत्थामा लघुप्राणं पुनर्वचनमब्रवीत् ॥ ४७
दुर्योधन जीवसि चेद्वाक्यं श्रोत्रसुखं शृणु ।
सप्त पाण्डवतः शिष्टा धार्तराष्ट्रास्त्रयो वयम् ॥ ४८
ते चैव भ्रातरः पञ्च वासुदेवोऽथ सात्यकिः ।
अहं च कृतवर्मा च कृपः शारद्वतस्तथा ॥ ४९
द्रौपदेया हताः सर्वे धृष्टद्युम्नस्य चात्मजाः ।
पञ्चाला निहताः सर्वे मत्स्यशेषं च भारत ॥ ५०
कृते प्रतिकृतं पश्य हतपुत्रा हि पाण्डवाः ।
सौप्तिके शिबिरं तेषां हतं सनरवाहनम् ॥ ५१
मया च पापकर्माऽसौ धृष्टद्युम्नो महीपते ।
प्रविश्य शिबिरं रात्रौ पशुमारेण मारितः ॥ ५२
दुर्योधनस्तु तां वाचं निशम्य मनसः प्रियाम् ।
प्रतिलभ्य पुनश्चेत इदं वचनमब्रवीत् ॥ ५३
न मेऽकरोत्तद्गाङ्गेयो न कर्णो न च ते पिता ।
यत्त्वया कृपभोजाभ्यां सहितेनाद्य मे कृतम् ॥ ५४

धर्मयुद्धे ह्यधर्मेणेति झ. पाठः ॥ २३ ॥

नवमोऽध्यायः ॥ ९ ॥

स च सेनापतिः क्षुद्रो हतः सार्धं शिखण्डिना ।
तेन मन्ये मघवता सममात्मानमद्य वै ॥ ५५
स्वस्ति प्राप्नुत भद्रं वः स्वर्गे नः संगमः पुनः ।
इत्येवमुक्त्वा पुत्रस्ते कुरुराजो महामनाः ॥ ५६
प्राणानुपासृजद्वीरः सुहृदां दुःखमादधत् ।
अपाक्रामद्दिवं पुण्यां शरीरं क्षितिमाविशत् ॥ ५७
एवं ते निधनं यातः पुत्रो दुर्योधनो नृप ।
अग्रे यात्वा रणे शूरः पश्चाद्विनिहतः परैः ॥ ५८
तथैव ते परिष्वक्ताः परिष्वज्य च ते नृपम् ।
पुनः पुनः प्रेक्षमाणाः स्वकानारुरुहू रथान् ॥ ५९
इत्येवं द्रोणपुत्रस्य निशम्य करुणां गिरम् ।
प्रत्यूषकाले शोकार्ताः प्राद्रवन्नगरं प्रति ॥ ६०
एवमेष क्षयो वृत्तः कुरुपाण्डवसेनयोः ।
घोरो विशसनो रौद्रो राजन्दुर्मन्त्रिते तव ॥ ६१
तव पुत्रे गते स्वर्गं शोकार्तस्य ममानघ ।
ऋषिदत्तं प्रनष्टं तद्दिव्यदर्शित्वमद्य वै ॥ ६२
वैशंपायन उवाच ।
इति श्रुत्वा स नृपतिर्ज्ञातिपुत्रवधं तदा ।
निःश्वस्य दीर्घमुष्णं च ततश्चिन्तापरोऽभवत् ॥ ६३

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि नवमोऽध्यायः ॥ ९ ॥

समाप्तं सौप्तिकपर्व १ ।

(अथैषीकपर्व ॥ २ ॥)

दशमोऽध्यायः ॥ १० ॥

दैवादुर्वरितेन धृष्टद्युम्नसारथिना युधिष्ठिराय रात्रौ वृत्तशिबिरवृत्तान्तविनेदनम् ॥ १ ॥ तच्छ्रवगेन द्रौपद्यानयनाय नकुलमादिश्य शिबिरभुवमुपागतवता युधिष्ठिरेण मृतनिजजनावलोकनेन परिदेवनम् ॥ २ ॥

वैशंपायन उवाच ।
तस्यां रात्र्यां व्यतीतायां धृष्टद्युम्नस्य सारथिः ।
गत्वा शशंस पाण्डुभ्यः सौप्तिके कदनं कृतम् ॥१
सूत उवाच ।
द्रौपदेया हता राजन्द्रुपदस्यात्मजैः सह ।
प्रमत्ता निशि विश्वस्ताः स्वपन्तः शिबिरे स्वके ॥२
गौतमेन नृशंसेन भोजेन कृतवर्मणा ।
अश्वत्थाम्ना च पापेन हतं वः शिबिरं निशि ॥ ३
एतैर्नरगजाश्वानां प्रासशक्तिपरश्वधैः ।
सहस्राणि निकृन्तद्भिर्निःशेषं शिबिरं कृतम् ॥ ४
'विक्रुष्टनानाविहगफलभारनतस्य ह ।'
छिद्यमानस्य महतो वनस्येव परश्वधैः ।
शुश्रुवे सुमहाञ्शब्दो बलस्य तव भारत ॥ ५
अहमेकोऽवशिष्टस्तु तस्मात्सैन्यान्महीपते ।
मुक्तः कथंचिद्धर्मात्मन्व्यग्राच्च कृतवर्मणः ॥ ६
तच्छ्रुत्वा वाक्यमशिवं कुन्तीपुत्रो युधिष्ठिरः ।
पपात मह्यां धर्मात्मा पुत्रशोकसमन्वितः ॥ ७
पतन्तं तमतिक्रम्य परिजग्राह सात्यकिः ।
भीमसेनोऽर्जुनश्चैव माद्रीपुत्रौ च पाण्डवौ ॥ ८
लब्धचेतास्तु कौन्तेयः शोकविह्वलया गिरा ।
जित्वा शत्रूञ्जितः पश्चात्पर्यदेवयदार्तवत् ॥ ९
'अगम्या गतिरर्थानां कर्मणामीश्वरस्य च ।'
दुर्विदा गतिरर्थानामपि ये दिव्यचक्षुषः ।
जीयमाना जयन्त्यन्ये जयमाना वयं जिताः ॥ १०
हत्वा भ्रातॄन्वयस्यांश्च पितॄन्पुत्रान्सुहृद्गणान् ।
बन्धूनमात्यान्पौत्रांश्च जित्वा सर्वाञ्जिता वयम् ॥ ११
अनर्थो ह्यर्थसंकाशस्तथाऽनर्थोऽर्थदर्शनः ।
जयोऽयमजयाकारो जयस्तस्मात्पराजयः ॥ १२

अतिक्रम्य धैर्यमर्यादां त्यक्त्वा पतन्तम् ॥ ८ ॥ अन्ये शत्रवः । जयमानाः जयन्तः । जितानां जयो जयतां पराजयः

यज्जित्वा तप्यते पश्चादापन्न इव दुर्मतिः ।
कथं मन्येत विजयं ततो जिततरः परैः ॥ १३
येषामर्थाय पापं स्याद्विजयस्य सुहृद्वधैः ।
निर्जितैरप्रमत्तैर्हि विजिता जितकाशिनः ॥ १४
कर्णिनालीकदंष्ट्रस्य खङ्गजिह्वस्य संयुगे ।
चापव्यात्तास्यरौद्रस्य ज्यातलस्वननादिनः ॥ १५
क्रुद्धस्य नरसिंहस्य संग्रामेष्वपलायिनः ।
ये व्यमुञ्चन्त कर्णस्य प्रमादात्त इमे हताः ॥ १६
रथह्रदं शरवर्षोर्मिमन्तं
रत्नाचितं वाहनयोधवृन्दम् ।
शक्त्यृष्टिमीनध्वजनागनक्रं
शरासनावर्तमहेषुफेनम् ॥ १७
संग्रामचन्द्रोदयवेगवेलं
द्रोणार्णवं ज्यातलनेमिघोषम् ।
ये तेरुरुच्चावचशस्त्रनौभि-
स्ते राजपुत्रा निहताः प्रमादात् ॥ १८
न हि प्रमादात्परमस्ति कश्चि-
द्वधो नराणामिह जीवलोके ।
प्रमत्तमर्था हि नरं समन्ता-
त्यजन्त्यनर्थाश्च समाविशन्ति ॥ १९
ध्वजोत्तमाग्रोच्छ्रितधूमकेतुं
शरार्चिषं दीप्तमहापताकम् ।
महाधनुर्ज्यातलनेमिघोषं
तनुत्रनानाविधशस्त्रहोमम् ॥ २०
महाचमूकक्षदवाभिपन्नं
महाहवे भीष्ममहादवाग्निम् ।
ये तेरुरुच्चावचशस्त्रवेगै-
स्ते राजपुत्रा निहताः प्रमादात् ॥ २१
न हि प्रमत्तेन नरेण शक्य-
माप्तुं वसु श्रीर्विपुलं यशो वा ।
पश्याप्रमादेन निहत्य शत्रू-
न्सर्वान्महेन्द्रं सुखमेधमानम् ॥ २२
इन्द्रोपमान्पार्थिवपुत्रपौत्रा-
न्पश्याविशेषेण हतान्प्रमादात् ।
तीर्त्वा समुद्रं वणिजः समृद्धा
मग्नाः कुनद्यामिव सीदमानाः ॥ २३
अमर्षितैर्ये निहता नरेन्द्रा
निःसंशयं ते त्रिदिवं प्रपन्नाः ।
कृष्णां तु शोचामि कथं नु साध्वी
शोकार्णवं सा विपहिष्यतीति ॥ २४
भ्रातॄंश्च पुत्रांश्च हतान्निशम्य
पाञ्चालराजं पितरं च वृद्धम् ।
ध्रुवं विसंज्ञा पतिता पृथिव्यां
सा शोष्यते शोककृशाङ्गयष्टिः ॥ २५
तच्छोकजं दुःखमपारयन्ती
कथं भविष्यत्युचिता सुखानाम् ।
रोरूयते ज्ञातिवधाभितप्ता
प्रदह्यमानेव हुताशनेन ॥ २६
इत्येवमार्तः परिदेवयन्स
राजा कुरूणां नकुलं बभाषे ।
गच्छानयैनामिह मन्दभाग्यां
समातृपक्षामिति राजपुत्रीम् ॥ २७
माद्रीसुतस्तत्परिगृह्य वाक्यं
धर्मेण धर्मप्रथमस्य राज्ञः ।
ययौ रथेनालयमाशु देव्याः
पाञ्चालराजस्य च यत्र दाराः ॥ २८
प्रस्थाप्य माद्रीसुतमाजमीढः
शोकार्दितस्तैः सहितः सुहृद्भिः ।
रोरूयमाणः प्रययौ सुताना-
मायोधनं भूतगणानुकीर्णम् ॥ २९
स तत्प्रविश्याशिवमुग्ररूपं
ददर्श पुत्रान्सुहृदः सखींश्च ।
भूमौ शयानान्रुधिरार्द्रगात्रा-
न्विभिन्नदेहान्प्रहृतोत्तमाङ्गान् ॥ ३०

फलतोऽभूदिति महदाश्चर्यमित्यर्थः ॥ १० ॥ पश्चात्स पाप इव दुर्मतिरिति क. पाठः ॥ १३ ॥ व्यमुञ्चन्त -मुक्ताः । कर्णस्य कर्णात् । प्रमादादसत्कृतादसान्निध्यात् ॥ १६ ॥ वाहनवाजियुक्तमिति झ. पाठः ॥ १७ ॥ तनुत्राणि नानाविधानि शस्त्राणि च तेषां होमः प्रक्षेपो यत्र तं तनुत्रनानाविधशस्त्रहोमम् ॥ २० ॥ भीष्ममयं भीष्मप्रधानं अग्निदाहम् । भीष्मरूपेण अग्निना दाहमित्यर्थः ॥ २१ ॥ निहताः शयाना इति झ. पाठः ॥ २४ ॥ दशमोऽध्यायः ॥ १० ॥

स तांस्तु दृष्ट्वा भृशमार्तरूपो
युधिष्ठिरो धर्मभृतां वरिष्ठः ।
उच्चैः प्रचुक्रोश च कौरवाग्र्यः
पपात चोर्व्यां सगणो विसंज्ञः ॥ ३१

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि ऐषीकपर्वणि दशमोऽध्यायः ॥ १० ॥

एकादशोऽध्यायः ॥ ११ ॥

नकुलेन युधिष्ठिरसमीपं प्रति द्रौपद्यानयनम् ॥ १ ॥ द्रौपद्या द्रौणिमस्तकमणिहरणचोदितेन भीमेन नकुलसारथिना रथेन द्रौणिवधाय प्रस्थानम् ॥ २ ॥

वैशंपायन उवाच ।
स दृष्ट्वा निहतान्सङ्ख्ये पुत्रान्पौत्रान्सखींस्तथा ।
महादुःखपरीतात्मा बभूव जनमेजय ॥ १
ततस्तस्य महाञ्शोकः प्रादुरासीन्महात्मनः ।
स्मरतः पुत्रपौत्रांस्तान्भ्रातॄन्सुहृद एव च ॥ २
तमश्रुपरिपूर्णाक्षं वेपमानमचेतसम् ।
सुहृदो भृशसंविग्नाः सान्त्वयांचक्रिरे तदा ॥ ३
'कृत्वा तु विधिवत्तेषां पुत्राणाममितौजसाम् ।
प्रेतकार्याणि सर्वेषां बभूव भृशदुःखितः ॥' ४
तस्मिन्मुहूर्ते जवनैर्वाजिभिर्हेममालिभिः ।
नकुलः कृष्णया सार्धमुपायात्परमार्तया ॥ ५
उपप्लाव्यं गता सा तु श्रुत्वा सुमहदप्रियम् ।
तदा विनाशं सर्वेषां पुत्राणां व्यथितेन्द्रिया ॥ ६
कम्पमानेव कदली वातेनाभिसमीरिता ।
कृष्णा राजानमासाद्य शोकार्ता न्यपतद्भुवि ॥ ७
न बभौ वदनं तस्या रुदन्त्याः शोककर्शितम् ।
फुल्लपद्मपलाशाक्ष्या मेघावृत इवोडुराट् ॥ ८
ततस्तां पतितां दृष्ट्वा संरम्भी सत्यविक्रमः ।
बाहुभ्यां परिजग्राह समुत्पत्य वृकोदरः ॥ ९
सा समाश्वासिता तेन भीमसेनेन भामिनी ।
रुदती पाण्डवज्येष्ठमिदं वचनमब्रवीत् ॥ १०
दिष्ट्या राजन्नवाप्येमामखिलां भोक्ष्यसे महीम् ।
आत्मजान्क्षत्रधर्मेण संप्रदाय यमाय वै ॥ ११
दिष्ट्या सर्वास्त्रकुशलं मत्तमातङ्गगामिनम् ।
अवाप्य पृथिवीं कृत्स्नां सौभद्रं न स्मरिष्यसि ॥ १२
आत्मजान्क्षत्रधर्मेण श्रुत्वा शूरान्निपातितान् ।
स्थितो राज्ये मया सार्धं विहरन्न स्मरिष्यसि ॥ १३
प्रसुप्तानां वधं श्रुत्वा द्रौणिना पापकर्मणा ।
शोको मां दहते गाढो हुताशन इवाश्रयम् ॥ १४
तस्य पापकृतो द्रौणेर्न चेदद्य दुरात्मनः ।
ह्रियते सानुबन्धस्य युधि विक्रम्य जीवितम् ॥ १५
इहैव प्रायमासिष्ये तन्निबोधत पाण्डवाः ।
न चेत्फलमवाप्नोति द्रौणिः पापस्य कर्मणः ॥ १६
एवमुक्त्वा ततः कृष्णा पाण्डवं प्रत्युपाविशत् ।
युधिष्ठिरं याज्ञसेनी धर्मराजं यशस्विनी ॥ १७
दृष्ट्वोपविष्टां राजा तु पाण्डवो महिषीं प्रियाम् ।
प्रत्युवाच स धर्मात्मा द्रौपदीं चारुदर्शनाम् ॥ १८
क्षत्रधर्मेण धर्मज्ञे प्राप्तास्ते निधनं शुभे ।
पुत्रास्ते भ्रातरश्चैव तान्न शोचितुमर्हसि ॥ १९
स कल्याणि वनं दुर्गं दूरं द्रौणिरितो गतः ।
तस्य त्वं पातनं सङ्ख्ये कथं ज्ञास्यसि शोभने ॥ २०
द्रौपद्युवाच ।
द्रोणपुत्रस्य सहजो मणिः शिरसि मे श्रुतः ।
निहत्य सङ्ख्ये तं पापं पश्येयं मणिमाहृतम् ।
द्रौणेः शिरस उत्कृत्य जीवेयमिति मे मतिः ॥ २१
इत्युक्त्वा पाण्डवं कृष्णा राजानं चारुदर्शना ।
भीमसेनकरे स्पृष्ट्वा कुपिता वाक्यमब्रवीत् ॥ २२
त्रातुमर्हसि मां भीम क्षत्रधर्ममनुस्मरन् ।
जहि तं पापकर्माणं शम्बरं मघवानिव ॥ २३
न हि ते विक्रमे तुल्यः पुमानस्तीह कश्चन ।
श्रुतं तत्सर्वलोकेषु परमव्यसने तथा ॥ २४
द्वीपोऽभूस्त्वं हि पार्थानां नगरे वारणावते ।

दिष्ट्येति । पुत्रनाशापेक्षया राज्यप्राप्तिसुखं तव महदिति धिक्षेपः ॥ ११ ॥

हिडिम्बदर्शने चैव तथा त्वमभवो गतिः ॥ २५
तथा विराटनगरे कीचकेन भृशार्दिताम् ।
मामप्युद्धृतवान्कृच्छ्रात्पौलोमीं मघवानिव ॥ २६
यथैतान्यकृथाः पार्थ महाकर्माणि वै पुरा ।
तथा द्रौणिममित्रघ्न विनिहत्य सुखी भव ॥ २७
वैशंपायन उवाच ।
तस्या बहुविधं दुःखं निशम्य परिदेवितम् ।
न चामर्षत कौन्तेयो भीमसेनो महाबलः ॥ २८
स काञ्चनविचित्राङ्गमारुरोह महारथम् ।
आदाय रुचिरं चित्रं समार्गणगुणं धनुः ॥ २९
नकुलं सारथिं कृत्वा द्रोणपुत्रवधे धृतः ।
विस्फार्य सशरं चापं तूर्णमश्वानचोदयत् ॥ ३०
ते हयाः पुरुषव्याघ्र दीप्यमानाः स्वतेजसा ।
वहन्तः सहसा जग्मुर्हरयः शीघ्रगामिनः ॥ ३१
शिबिरात्स्वाद्गृहीत्वा स रथस्य पदमच्युतः ।
'द्रोणपुत्रगतेनाशु ययौ मार्गेण भारत ॥' ३२

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि ऐषीकपर्वणि एकादशोऽध्यायः ॥ ११ ॥

द्वादशोऽध्यायः ॥ १२ ॥

द्रौणिजिघांसया भीमे प्रतिगते कृष्णेन युधिष्ठिरंप्रति द्रौणिदौःशील्यादिकथनपूर्वकं भीमस्य ततो रक्षणीयत्वकथनम् ॥ १ ॥

वैशंपायन उवाच ।
तस्मिन्प्रयाते दुर्धर्षे यदूनामृषभस्ततः ।
अब्रवीत्पुण्डरीकाक्षः कुन्तीपुत्रं युधिष्ठिरम् ॥ १
एष पाण्डव ते भ्राता पुत्रशोकपरायणः ।
जिघांसुर्द्रौणिमाक्रन्दे एक एवाभिधावति ॥ २
भीमः प्रियस्ते सर्वेभ्यो भ्रातृभ्यो भरतर्षभ ।
तं कृच्छ्रगतमद्य त्वं कस्मान्नाभ्युपपद्यसे ॥ ३
यत्तदाचष्ट पुत्राय द्रोणः परपुरंजयः ।
अस्त्रं ब्रह्मशिरो नाम दहेत पृथिवीमपि ॥ ४
तन्महात्मा महाभागः केतुः सर्वधनुष्मताम् ।
प्रत्यपादयदाचार्यः प्रीयमाणो धनञ्जयम् ॥ ५
तं पुत्रोऽप्येक एवैनमन्वयाचदमर्षणः ।
ततः प्रोवाच पुत्राय नातिहृष्टमना इव ॥ ६
विदितं चापलं ह्यासीदात्मजस्य दुरात्मनः ।
सर्वधर्मविदाचार्यः सोऽन्वशासत्सुतं ततः ॥ ७
परमापद्गतेनापि न स्म तात त्वया रणे ।
इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषतः ॥ ८
इत्युक्तवान्गुरुः पुत्रं द्रोणः पश्चादथोक्तवान् ।
न त्वं जातु सतां मार्गे स्थातेति पुरुषर्षभ ॥ ९
स तदाज्ञाय दुष्टात्मा पितुर्वचनमप्रियम् ।
निराशः सर्वकल्याणैः शोकात्पर्यचरन्महीम् ॥ १०
ततस्तदा कुरुश्रेष्ठ वनस्थे त्वयि भारत ।
अवसद्द्वारकामेत्य वृष्णिभिः परमार्चितः ॥ ११
स कदाचित्समुद्रान्ते वसन्द्वारवतीमनु ।
एक एकं समागम्य मामुवाच हसन्निव ॥ १२
यत्तदुग्रं तपः कृष्ण चरन्नमितविक्रमः ।
अगस्त्याद्भारताचार्यः प्रत्यपद्यत मे पिता ॥ १३
अस्त्रं ब्रह्मशिरो नाम देवगन्धर्वपूजितम् ।
तदद्य मयि दाशार्ह यथा पितरि मे तथा ॥ १४
अस्मत्तस्तदुपादाय दिव्यमस्त्रं यदूत्तम ।
ममाप्यस्त्रं प्रयच्छ त्वं चक्रं रिपुहणं रणे ॥ १५
स राजन्प्रीयमाणेन मयाप्युक्तः कृताञ्जलिः ।
याचमानः प्रयत्नेन मत्तोऽस्त्रं भरतर्षभ ॥ १६
देवदानवगन्धर्वमनुष्यपतगोरगाः ।
न समा मम वीर्यस्य शतांशेनापि पिण्डिताः ॥ १७
इदं धनुरियं शक्तिरिदं चक्रमियं गदा ।
यद्यदिच्छसि चेदस्त्रं मत्तस्तत्तद्ददामि ते ॥ १८
यच्छक्नोषि समुद्यन्तुं प्रयोक्तुमपि वा रणे ।

चोदिता वातरंहस इति झ. पाठः ॥ ३१ ॥ पदं गमनमार्गचिह्नं गृहीत्वालक्ष्य ॥ ३२ ॥ एकादशोऽध्यायः ॥ ११ ॥

आक्रन्दे संग्रामे ॥ २ ॥ स्थाता स्थास्यसि ॥ ९ ॥

तद्गृहाण विनाऽस्त्रेण यन्मे दातुमभीप्ससि ॥ १९
स सुनाभं सहस्रारं वज्रनाभमयस्मयम् ।
वव्रे चक्रं महाभागो मत्तः स्पर्धन्मया सह ॥ २०
गृहाण चक्रमित्युक्तो मया तु तदनन्तरम् ।
जग्राहोत्पत्य सहसा चक्रं सव्येन पाणिना ॥ २१
न चैनमशकत्स्थानात्संचालयितुमप्युत ।
अथैनं दक्षिणेनापि ग्रहीतुमुपचक्रमे ॥ २२
सर्वयत्नेन तेनापि गृह्य नैनमकम्पयत् ॥ २३
ततः सर्वबलेनापि यदैनं न शशाक ह ।
उद्यन्तुं वा चालयितुं द्रौणिः परमदुर्मनाः ।
कृत्वा यत्नं परिश्रान्तः स न्यवर्तत भारत ॥ २४
निवृत्तमनसं तस्मादभिप्रायाद्विचेतसम् ।
अहमामन्त्र्य संविग्नमश्वत्थामानमब्रुवम् ॥ २५
यः स दैवमनुष्येषु प्रमाणं परमं गतः ।
गाण्डीवधन्वा श्वेताश्वः कपिप्रवरकेतनः ॥ २६
यः साक्षाद्देवदेवेशं शितिकण्ठमुमापतिम् ।
द्वन्द्वयुद्धे पुरा जिष्णुस्तोषयामास शंकरम् ॥ २७
यस्मात्प्रियतरो नास्ति ममान्यः पुरुषो भुवि ।
नादेयं यस्य मे किंचिदपि प्राणान्महात्मनः ॥ २८
तेनापि सुहृदा ब्रह्मन्पार्थेनाक्लिष्टकर्मणा ।
नोक्तपूर्वमिदं वाक्यं यस्त्वं मामभिभाषसे ॥ २९
ब्रह्मचर्यं महद्धोरं तीर्त्वा द्वादशवार्षिकम् ।
हिमवत्पार्श्वमास्थाय यो मया तपसाऽऽर्जितः ॥ ३०
समानव्रतचारिण्यां रुक्मिण्यां योऽन्वजायत ।
सनत्कुमारस्तेजस्वी प्रद्युम्नो नाम मे सुतः ॥ ३१
तेनाप्येतन्महद्दिव्यं चक्रमप्रतिमं रणे ।
न प्रार्थितमभून्मूढ तदिदं प्रार्थितं त्वया ॥ ३२
रामेणातिबलेनैतन्नोक्तपूर्वं कदाचन ।
न गदेन न साम्बेन यदिदं प्रार्थितं त्वया ॥ ३३
द्वारकावासिभिश्चान्यैर्वृष्ण्यन्धकमहारथैः ।
नोक्तपूर्वमिदं क्षुद्रं तदिदं प्रार्थितं त्वया ॥ ३४
भारताचार्यपुत्रस्त्वं मानितः सर्वयादवैः ।
चक्रेण रथिनां श्रेष्ठ कं नु तात युयुत्ससे ॥ ३५
एवमुक्तो मया द्रौणिर्मामिदं प्रत्युवाच ह ।
प्रयुज्य भवते पूजां योत्स्ये कृष्ण त्वया सह ॥ ३६
प्रार्थितं ते मया चक्रं देवदानवपूजितम् ।
अजेयः स्यामिति विभो सत्यमेतद्ब्रवीमि ते ॥ ३७
सोऽहं तद्दुर्लभं चक्रमनवाप्यैव केशव ।
प्रतियास्यामि गोविन्द शिवेनाभिवदस्व माम् ॥ ३८
एतत्सुनाभं भोजानामृषभेण त्वया धृतम् ।
चक्रमप्रतिचक्रेण भुवि नान्योऽभिपद्यते ॥ ३९
एतावदुक्त्वा द्रौणिर्मां युग्यानश्वान्धनानि च ।
आदायोपययौ काले रत्नानि विविधानि च ॥ ४०
स संरम्भी दुरात्मा च चपलः क्रूर एव च ।
वेद चास्त्रं ब्रह्मशिरस्तस्माद्रक्ष्यो वृकोदरः ॥ ४१

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि ऐषीकपर्वणि द्वादशोऽध्यायः ॥ १२ ॥

त्रयोदशोऽध्यायः ॥ १३ ॥

कृष्णादिभिर्भागीरथीतीरे व्याससमीपसमासीनद्रौणिदर्शनम् ॥ १ ॥ तद्दर्शिना द्रौणिना अपाण्डवहेतोर्ब्रह्मशिरोस्त्रप्रयोगः ॥ २ ॥

वैशंपायन उवाच ।
एवमुक्त्वा कुरुश्रेष्ठं सर्वयादवनन्दनः ।
सर्वायुधवरोपेतमारुरोह रथोत्तमम् ॥ १
युक्तं परमकाम्भोजैस्तुरगैर्हेममालिभिः ।
उदितादित्यसंकाशं सर्वरत्नविभूषितम् ॥ २
दक्षिणे ह्यावहच्छैब्यः सुग्रीवः सव्यतो धुरम् ।
पार्ष्णिवाहौ तु तस्यास्तां मेघपुष्पबलाहकौ ॥ ३
विश्वकर्मकृता दिव्या रत्नधातुविभूषिता ।
उच्छ्रिता च रथे तस्मिन्ध्वजयष्टिरदृश्यत ॥ ४
वैनतेयः स्थितस्तस्यां प्रभामण्डलरश्मिवान् ।

मे मह्यं दातुमिच्छसि तेन विनापि गृहाण । त्वदीयेऽस्त्रे ममेच्छा नास्तीति भावः ॥ १९ ॥ द्वादशोऽध्यायः ॥ १२ ॥

तस्य सत्यवतः केतुर्भुजगारिरदृश्यत ॥ ५
अथारोहद्धृषीकेशः केतुः सर्वधनुष्मताम् ।
अर्जुनः स च धर्मात्मा कुरुराजो युधिष्ठिरः ॥ ६
अशोभेतां महात्मानौ दाशार्हमभितः स्थितौ ।
रथस्थं शार्ङ्गधन्वानमश्विनाविव वासवम् ॥ ७
उभावारोप्य दाशार्हः स्यन्दनं लोकपूजितम् ।
प्रतोदेन जवोपेतान्परमाश्वानचोदयत् ॥ ८
ते हयाः सहसोत्पेतुर्गृहीत्वा स्यन्दनोत्तमम् ।
आस्थितं पाण्डवेयाभ्यां यदूनामृषभेण च ॥ ९
वहतां शार्ङ्गधन्वानमश्वानां शीघ्रगामिनाम् ।
प्रादुरासीन्महाञ्शब्दः पक्षिणां पततामिव ॥ १०
ते समर्था महाबाहुं क्षणेन भरतर्षभ ।
भीमसेनं महेष्वासमनुसस्रुः सुवेगिताः ॥ ११
क्रोधदीप्तं तु कौन्तेयं द्विषदर्थे समुद्यतम् ।
नाशक्नुवन्वारयितुं समेत्यापि महारथाः ॥ १२
स तेषामग्रतः शूरः श्रीमतां दृढधन्विनाम् ।
ययौ भागीरथीतीरं हरिभिर्भृशवेगितैः ।
यत्र स श्रूयते द्रौणिः पुत्रहन्ता दुरात्मवान् ॥ १३
स ददर्श महात्मानमुदकान्ते यशस्विनम् ।
कृष्णद्वैपायनं व्यासमासीनमृषिभिः सह ॥ १४
तं चैव क्रूरकर्माणं घृताक्तं कुशचीरिणम् ।
रजसा ध्वस्तमासीनं ददर्श द्रौणिमन्तिके ॥ १५
तमभ्यधावत्कौन्तेयः प्रगृह्य सशरं धनुः ।
भीमसेनो महाबाहुस्तिष्ठतिष्ठेति चाब्रवीत् ॥ १६
तं दृष्ट्वा भीमकर्माणं प्रगृहीतशरासनम् ।
भ्रातरौ पृष्ठतश्चास्य जनार्दनरथे स्थितौ ।
व्यथितात्माऽभवद्द्रौणिः प्राप्तं चेदममन्यत ॥ १७
स तद्दिव्यमदीनात्मा परमास्त्रमचिन्तयत् ।
जग्राह च शरैषीकां द्रौणिः सव्येन पाणिना ॥ १८
स तामापदमासाद्य दिव्यमस्त्रमुदैरयत् ।
अमृष्यमाणस्ताञ्शूरान्दिव्यायुधधरान्स्थितान् ।
अपाण्डवायेति रुषा वाचमुत्सृज्य दारुणम् ॥ १९
इत्युक्त्वा राजशार्दूल द्रोणपुत्रः प्रतापवान् ।
सर्वलोकप्रमोहार्थं तदस्त्रं प्रमुमोच ह ॥ २०
ततस्तस्यामिषीकायां पावकः समजायत ।
प्रधक्ष्यन्निव लोकांस्त्रीन्कालान्तकयमोपमः ॥ २१

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि ऐषीकपर्वणि त्रयोदशोऽध्यायः ॥ १३ ॥

चतुर्दशोऽध्यायः ॥ १४ ॥

अर्जुनेन कृष्णाज्ञया द्रौण्यस्त्रप्रत्यस्त्रप्रयोगः ॥ १ ॥

वैशंपायन उवाच ।
इङ्गितेनैव दाशार्हस्तस्याभिप्रायमादितः ।
द्रौणेर्बुद्ध्वा महाबाहुरर्जुनं प्रत्यभाषत ॥ १
अर्जुनार्जुन यद्दिव्यमस्त्रं ते हृदि वर्तते ।
द्रोणोपदिष्टं तस्यायं कालः संप्रति पाण्डव ॥ २
भ्रातॄणामात्मनश्चैव परित्राणाय भारत ।
विसृजैतत्त्वमप्याजावस्त्रमस्त्रनिवारणम् ॥ ३
केशवेनैवमुक्तोऽथ पाण्डवः परवीरहा ।
अवातरद्रथात्तूर्णं प्रगृह्य सशरं धनुः ॥ ४
पूर्वमाचार्यपुत्राय ततोऽनन्तरमात्मने ।
भ्रातृभ्यश्चैव सर्वेभ्यः स्वस्तीत्युक्त्वा परंतपः ॥ ५
देवताभ्यो नमस्कृत्य गुरुभ्यश्चैव सर्वशः ।
उत्ससर्ज शिवं ध्यायन्नस्त्रमस्त्रेण शाम्यताम् ॥ ६
ततस्तदस्त्रं सहसा सृष्टं गाण्डीवधन्वना ।
प्रजज्वाल महार्चिष्मद्युगान्तानलसन्निभम् ॥ ७
तथैव द्रोणपुत्रस्य तदस्त्रं तिग्मतेजसः ।
प्रजज्वाल महाज्वालं तेजोमण्डलसंवृतम् ॥ ८
निर्घाता बहवश्चासन्पेतुरुल्काः सहस्रशः ।

अपाण्डवाय पाण्डवानामभावाय ॥ १९ ॥

त्रयोदशोऽध्यायः ॥ १३ ॥

महद्भयं च भूतानां सर्वेषां समजायत ॥ ९
सशब्दमभवद्व्योम ज्वालामालाकुलं भृशम् ।
चचाल च मही कृत्स्ना सपर्वतवनद्रुमा ॥ १०
तावस्त्रतेजसा लोकांस्त्रासयन्तौ ततः स्थितौ ।
महर्षी सहितौ तत्र दर्शयामासतुस्तदा ॥ ११
नारदः सर्वधर्मात्मा भरतानां पितामहः ।
उभौ शमयितुं वीरौ भारद्वाजधनञ्जयौ ॥ १२
तौ मुनी सर्वधर्मज्ञौ सर्वभूतहितैषिणौ ।
दीप्तयोरस्त्रयोर्मध्ये स्थितौ परमतेजसौ ॥ १३
तदन्तरमनाधृष्यावुपगम्य यशस्विनौ ।
आस्तामृषिवरौ तत्र ज्वलिताविव पावकौ ॥ १४
प्राणभृद्भिरनाधृष्यौ देवदानवसंमतौ ।
अस्त्रतेजः शमयितुं लोकानां हितकाम्यया ॥ १५
ऋषी ऊचतुः ।
महास्त्रविदुषः पूर्वे येऽप्यतीता महारथाः ।
नैतदस्त्रं मनुष्येषु तैः प्रयुक्तं कथंचन ।
किमिदं साहसं वीरौ कृतवन्तौ महात्ययम् ॥ १६

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि ऐषीकपर्वणि चतुर्दशोऽध्यायः ॥ १४ ॥

पञ्चदशोऽध्यायः ॥ १५ ॥

अर्जुनेन व्यासनारदभावानुरोधेन स्वप्रयुक्तब्रह्मशिरोस्त्रप्रतिसंहारः ॥ १ ॥ कृष्णेनाश्वत्थामानं प्रति उत्तरागर्भे ऐषीकास्त्रपातेऽपि मृतशिशोः स्वेन समुज्जीवनप्रतिज्ञा ॥ २ ॥ ब्रह्मचर्याभावादस्त्रप्रतिसंहारासमर्थेन द्रौणिना व्यासकृष्णावनादृत्य पाण्डवगर्भेष्वैषीकास्त्रोत्सर्जनम् ॥ ३ ॥

वैशंपायन उवाच ।
दृष्ट्वैव मुनिशार्दूलौ तावग्निसमतेजसौ ।
'गाण्डीवधन्वा संचिन्त्य प्राप्तकालं महारथः ।'
संजहार शरं दिव्यं त्वरमाणो धनञ्जयः ॥ १
उवाच वचनं श्रेष्ठस्तावृषी प्राञ्जलिस्तदा ।
प्रमुक्तमस्त्रमस्त्रेण शाम्यतामिति वै मया ॥ २
संहृते परमास्त्रेऽस्मिन्सर्वानस्मानशेषतः ।
पापकर्मा ध्रुवं द्रौणिः प्रधक्ष्यत्यस्त्रतेजसा ॥ ३
यदत्र हितमस्माकं लोकानां चैव सर्वथा ।
भवन्तौ देवसंकाशौ तथा संमन्तुमर्हतः ॥ ४
इत्युक्त्वा संजहारास्त्रं पुनरेव धनञ्जयः ।
संहारो दुष्करस्तस्य देवैरपि हि संयुगे ॥ ५
विसृष्टस्य रणे तस्य परमास्त्रस्य संग्रहे ।
अशक्तः पाण्डवादन्यः साक्षादपि शतक्रतुः ॥ ६
ब्रह्मतेजोद्भवं तद्धि विसृष्टमकृतात्मना ।
न शक्यमावर्तयितुं ब्रह्मचर्यव्रतादृते ॥ ७
अचीर्णब्रह्मचर्यो यः सृष्ट्वाऽऽवर्तयते पुनः ।
तदस्त्रं सानुबन्धस्य मूर्धानं तस्य कृन्तति ॥ ८
ब्रह्मचारी व्रती चापि दुरवापमवाप्य तत् ।
परमव्यसनार्तोऽपि नार्जुनोऽस्त्रं व्यमुञ्चत ॥ ९
सत्यव्रतधरः शूरो ब्रह्मचारी च पाण्डवः ।
गुरुवर्ती च तेनास्त्रं संजहारार्जुनः पुनः ॥ १०
द्रौणिरप्यथ संप्रेक्ष्य सोऽन्तरा तावृषी स्थितौ ।
न शशाक पुनर्घोरमस्त्रं संहर्तुमोजसा ॥ ११
अशक्तः प्रतिसंहारे परमास्त्रस्य संयुगे ।
द्रौणिर्दीनमना राजन्द्वैपायनमभाषत ॥ १२
उत्तमव्यसनार्तेन प्राणत्राणमभीप्सुना ।
मयैतदस्त्रमुत्सृष्टं भीमसेनभयान्मुने ॥ १३
अधर्मश्च कृतोऽनेन धार्तराष्ट्रं जिघांसता ।
मिथ्याचारेण भगवन्भीमसेनेन संयुगे ॥ १४
अतः सृष्टमिदं ब्रह्मन्मयाऽस्त्रमकृतात्मना ।
तस्य भूयोऽपि संहारं कर्तुं नाहमिहोत्सहे ॥ १५
निसृष्टं हि मया दिव्यमेतदस्त्रं दुरासदम् ।
अपाण्डवायेति मुने वह्नितेजोऽनुमन्त्र्य वै ॥ १६
तदिदं पाण्डवेयानामन्तायैवाभिसंहितम् ।

आवर्तयते उपसंहरति ॥ ८ ॥

अद्य पाण्डुसुतान्सर्वाञ्जीविताद्भ्रंशयिष्यति ॥ १७
कृतं पापमिदं ब्रह्मन्रोषाविष्टेन चेतसा ।
वधमाशास्य पार्थानां मयास्त्रं सृजता रणे ॥ १८
व्यास उवाच ।
अस्त्रं ब्रह्मशिरस्तात विद्वान्पार्थो धनञ्जयः ।
उत्सृष्टवानहिंसार्थं न रोषेण तवाहवे ॥ १९
अस्त्रमस्त्रेण तु रणे तव संशमयिष्यता ।
विसृष्टमर्जुनेनेदं पुनश्च प्रतिसंहृतम् ॥ २०
ब्रह्मास्त्रमप्यवाप्यैतदुपदेशात्पितुस्तव ।
क्षत्रधर्मान्महाबाहुर्नाकम्पत धनञ्जयः ॥ २१
एवं धृतिमतः साधोः सर्वास्त्रविदुषः सतः ।
सभ्रातृबन्धोः कस्मात्त्वं वधमस्य चिकीर्षसि ॥ २२
अस्त्रं ब्रह्मशिरो यत्र परमास्त्रेण वध्यते ।
समा द्वादश पर्जन्यस्तद्राष्ट्रं नाभिवर्षति ॥ २३
एतदर्थं महाबाहुः शक्तिमानपि पाण्डवः ।
न विहन्यात्तदस्त्रं तु प्रजाहितचिकीर्षया ॥ २४
पाण्डवास्त्वं च राष्ट्रं च सदा संरक्ष्यमेव नः ।
तस्मात्संहर दिव्यं त्वमस्त्रमेतन्महाभुज ॥ २५
अरोषस्तव चैवास्तु पार्थाः सन्तु निरामयाः ।
न ह्यधर्मेण राजर्षिः पाण्डवो जेतुमिच्छति ॥ २६
मणिं चैव प्रयच्छाद्य यस्ते शिरसि तिष्ठति ।
एतदादाय ते प्राणान्प्रतिदास्यन्ति पाण्डवाः॥ २७
द्रौणिरुवाच ।
पाण्डवैर्यानि रत्नानि यच्चान्यत्कौरवैर्धनम् ।
अवाप्तमिह तेभ्योऽयं मणिर्मम विशिष्यते ॥ २८
यमाबध्य भयं नास्ति शस्त्रव्याधिक्षुधाश्रयम् ।
देवेभ्यो दानवेभ्यो वा नागेभ्यो वा कथंचन ॥ २९
न च रक्षोगणभयं न तस्करभयं तथा ।
एवंवीर्यो मणिरयं न मे त्याज्यः कथंचन ॥ ३०
यत्तु मे भगवानाह तन्मे कार्यमनन्तरम् ।
अयं मणिरयं चाहमिषीका तु पतिष्यति ।
गर्भेषु पाण्डुपुत्राणामुत्तरायास्तथोदरे ॥ ३१
वैशंपायन उवाच ।
प्राह द्रोणसुतं तत्र व्यासः परमदुर्मनाः ॥ ३२
एवं कुरु न चान्यत्र बुद्धिः कार्या कथंचन ।
गर्भेषु पाण्डवेयानां विसृज्यैतदुपारम ॥ ३३
'तमुवाच हृषीकेशः पाण्डवानां हिते मतः ।
भविष्यमेकमुत्सृज्य गर्भेष्वस्त्रं निपात्यताम् ॥ ३४
अहमेनं ददाम्येषां पिण्डदं कीर्तिवर्धनम् ।
राजर्षिं पुण्यकर्माणमनेकक्रतुयाजिनम् ॥ ३५
एवं कुरु न चान्या ते बुद्धिः कार्या कथंचन ।
आगर्भात्पाण्डवेयानां कृत्वा पातं विनङ्क्ष्यति' ३६
एवं ब्रुवाणं गोविन्दं वृषभं सर्वसात्वताम् ।
द्रौणिः परमसंक्रुद्धः प्रत्युवाचेदमुत्तरम् ॥ ३७
नैतदेवं यदात्थ त्वं पक्षपातेन केशव ।
वचनात्पुण्डरीकाक्ष तव मद्वाक्यमन्यथा ॥ ३८
पतिष्यत्येतदस्त्रं वै गर्भे तस्या मयोद्यतम् ।
विराटदुहितुः कृष्ण यं त्वं रक्षितुमर्हसि ॥ ३९
वासुदेव उवाच ।
अमोघः परमास्त्रस्य पातस्त्वद्य भविष्यति ।
'अभिमन्योः सृजैषीकां गर्भस्थः शाम्यतां शिशुः ॥
अहमेनं मृतं जातं जीवयिष्यामि बालकम् ।'
स तु गर्भो मृतो जातो दीर्घमायुरवाप्स्यति ॥ ४१
'इत्युक्तः प्रत्युवाचैनं द्रोणपुत्रः स्मयन्निव ।
यद्यस्त्रदग्धं गोविन्द जीवयस्येवमस्त्विति ॥' ४२
ततः परममस्त्रं तु द्रौणिरुद्यतमाहवे ।
द्वैपायनमनादृत्य गर्भेषु प्रमुमोच ह ॥ ४३

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि ऐषीकपर्वणि पञ्चदशोऽध्यायः ॥ १५ ॥

एवं जीवितमादाय तव यास्यन्ति पाण्डवाः । इति क. पाठः २७ ॥ मम वध्यभयं नास्तीति क. पाठः ॥ २९ ॥

पञ्चदशोऽध्यायः ॥ १५ ॥

षोडशोऽध्यायः ॥ १६ ॥

कृष्णेन स्ववचनोल्लङ्घनेनास्त्रप्रयोक्तुरश्वत्थाम्नः शापदानं व्यासेन तदनुमोदनं च ॥ १ ॥ भीमेन द्रौणिमस्तकमणिदानेन द्रौपदीसमाश्वासनम् ॥ २ ॥ युधिष्ठिरेण द्रौपदीवचनात्स्वमस्तके तन्मणिधारणम् ॥ ३ ॥

वैशंपायन उवाच ।
तदाज्ञाय हृषीकेशो विकृष्टं पापकर्मणा ।
हृष्यमाण इदं वाक्यं द्रौणिं प्रत्यब्रवीत्तदा ॥ १
विराटस्य सुतां पूर्वं स्नुषां गाण्डीवधन्वनः ।
उपप्लाव्यगतां दृष्ट्वा ऋतवाग्ब्राह्मणोऽब्रवीत् ॥ २
परिक्षीणेषु कुरुषु पुत्रस्तव भविष्यति ।
एतदस्य परिक्षित्त्वं गर्भस्थस्य भविष्यति ॥ ३
तस्य तद्वचनं साधोः सत्यमेतद्भविष्यति ।
परिक्षिद्भविता ह्येषां पुनर्वंशकरः सुतः ॥ ४
त्वां तु कापुरुषं पापं विदुः सर्वे मनीषिणः ।
असकृत्पापकर्माणं बालजीवितघातकम् ॥ ५
तस्मात्त्वमस्य पापस्य कर्मणः फलमाप्नुहि ।
त्रीणि वर्षसहस्राणि चरिष्यसि महीमिमाम् ॥ ६
अप्राप्नुवन्क्वचित्कांचित्संविदं जातु केनचित् ।
निर्जनानसहायस्त्वं देशान्प्रविचरिष्यसि ॥ ७
भवित्री न हि ते क्षुद्र जनमध्येषु संस्थितिः ।
पूयशोणितगन्धी च दुर्गकान्तारसंश्रयः ।
विचरिष्यसि पापात्मंश्चिरमेको वसुंधराम् ॥ ८
वयः प्राप्य परिक्षित्तु देवव्रतमवाप्य च ।
कृपाच्छारद्वताच्छूरः सर्वास्त्राण्युपपत्स्यते ॥ ९
विदित्वा परमास्त्राणि क्षत्रधर्मव्रते स्थितः ।
षष्टिं वर्षाणि धर्मात्मा वसुधां पालयिष्यति ॥ १०
इतश्चोर्ध्वं महाबाहुः कुरुराजो भविष्यति ।
परिक्षिन्नाम नृपतिर्मिषतस्ते सुदुर्मते ॥ ११
[अहं तं जीवयिष्यामि दग्धं शस्त्राग्नितेजसा ।]
पश्य मे तपसो वीर्यं सत्यस्य च नराधम ॥ १२

व्यास उवाच ।
यस्मादनादृत्य कृतं त्वयाऽस्मान्कर्म दारुणम् ।
ब्राह्मणस्य सतश्चेदं वृत्तमन्यायवर्तिनः ॥ १३
तस्माद्यद्देवकीपुत्र उक्तवानुत्तमं वचः ।
आलोकात्तव तद्भावि क्षुद्रकर्मन्व्रजेति ह ॥ १४
अश्वत्थामोवाच ।
सहैव भवता ब्रह्मन्स्थास्यामि पुरुषेष्विह ।
सत्यवागस्तु भगवानयं च पुरुषोत्तमः ॥ १५
वैशंपायन उवाच ।
प्रदायाथ मणिं द्रौणिः पाण्डवानां महात्मनाम् ।
जगाम विमनास्तेषां सर्वेषां पश्यतां वनम् ॥ १६
पाण्डवाश्च सदाशार्हास्तानृषीनभिवाद्य च ।
कृष्णद्वैपायनं चैव नारदं चैव पर्वतम् ॥ १७
द्रोणपुत्रस्य सहजं मणिमादाय सत्वराः ।
द्रौपदीमभ्यधावन्त प्रायोपेतां मनस्विनीम् ॥ १८
वैशंपायन उवाच ।
ततस्ते पुरुषव्याघ्राः सदश्वैरनिलोपमैः ।
अभ्ययुः सहदाशार्हाः शिबिरं पुनरेव हि ॥ १९
अवतीर्य रथेभ्यस्तु त्वरमाणा महारथाः ।
ददृशुर्द्रौपदीं कृष्णामार्तामार्ततराः स्वयम् ॥ २०
तामुपेत्य निरानन्दां दुःखशोकसमन्विताम् ।
परिवार्य व्यतिष्ठन्त पाण्डवाः सहकेशवाः ॥ २१
ततो राज्ञाऽभ्यनुज्ञातो भीमसेनो महाबलः ।
प्रददौ तं मणिं दिव्यं वचनं चेदमब्रवीत् ॥ २२
अयं भद्रे तव मणिः पुत्रहन्ता जितश्च ते ।
उत्तिष्ठ शोकमुत्सृज्य क्षात्रधर्ममनुस्मर ॥ २३

संविदं संलापम् ॥ ७ ॥ प्रायोपेतां मरणार्थं यो नियमस्तेनोपेताम् ॥ १८ ॥ हृष्टामश्वत्थाम्नः पराभवेन । आर्ता पुत्रादेः शोकेन ॥ २० ॥

प्रयाणे वासुदेवस्य शमार्थमसितेक्षणे ।
यान्युक्तानि त्वया भीरु वाक्यानि मधुघातिनि २४
नैव मे पतयः सन्ति न पुत्रा भ्रातरो न च ।
न वै त्वमिति गोविन्द शममिच्छति राजनि ॥ २५
उक्तवत्यसि तीव्राणि वाक्यानि पुरुषोत्तमम् ।
क्षत्रधर्मानुरूपाणि तानि संस्मर्तुमर्हसि ॥ २६
हतो दुर्योधनः पापो राज्यस्य परिपन्थिकः ।
दुःशासनस्य रुधिरं पीतं विस्फुरतो मया ॥ २७
वैरस्य गतमानृण्यं न स्म वाच्या विवक्षताम् ।
जित्वा मुक्तो द्रोणपुत्रो ब्राह्मण्याद्गौरवेण च ॥ २८
यशोऽस्य पतितं देवि शरीरं त्ववशेषितम् ।
वियोजितश्च मणिना भ्रंशितश्चायुधं भुवि ॥ २९
द्रौपद्युवाच ।
केवलानृण्यमाप्ताऽस्मि गुरुपुत्रो गुरुर्मम ।
शिरस्येतं मणिं राजा प्रहीतुमनघोऽर्हति ॥ ३०
तं गृहीत्वा ततो राजा शिरस्येवाकरोत्तदा ।
गुरोरुच्छेषमित्येव द्रौपद्या वचनादपि ॥ ३१
ततो दिव्यं मणिवरं शिरसा धारयन्प्रभुः ।
शुशुभे स तदा राजा सचन्द्र इव पर्वतः ॥ ३२
उत्तस्थौ पुत्रशोकार्ता ततः कृष्णा मनस्विनी ।
कृष्णं चापि महाबाहुः परिपप्रच्छ धर्मराट् ॥ ३३

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि ऐषीकपर्वणि षोडशोऽध्यायः ॥ १६ ॥

सप्तदशोऽध्यायः ॥ १७ ॥

युधिष्ठिरेण द्रौणेरेकस्य बहुमारणशक्तिप्रश्ने कृष्णेन रुद्रप्रसादादित्युक्त्वा रुद्रमहिमकथनम् ॥ १ ॥

वैशंपायन उवाच ।
हतेषु सर्वसैन्येषु सौप्तिके तै रथैस्त्रिभिः ।
शोचन्युधिष्ठिरो राजा दाशार्हमिदमब्रवीत् ॥ १
कथं नु कृष्ण पापेन क्षुद्रेण शठबुद्धिना ।
द्रौणिना निहताः सर्वे मम पुत्रा महारथाः ॥ २
तथा कृतास्त्रविक्रान्ताः संग्रामेष्वपलायिनः ।
द्रुपदस्यात्मजाश्चैव द्रोणपुत्रेण पातिताः ॥ ३
यस्य द्रोणो महेष्वासो न प्रादादाहवे मुखम् ।
निजघ्ने रथिनां श्रेष्ठं धृष्टद्युम्नं कथं नु सः ॥ ४
किंनु तेन कृतं कर्म तथायुक्तं नरर्षभ ।
यदेकः समरे सर्वानवधीन्नो गुरोः सुतः ॥ ५
श्रीभगवानुवाच ।
नूनं स देवदेवानामीश्वरेश्वरमव्ययम् ।
जगाम शरणं द्रौणिरेकस्तेनावधीद्बहून् ॥ ६
प्रसन्नो हि महादेवो दद्यादमरतामपि ।
वीर्यं च गिरिशो दद्याद्येनेन्द्रमपि शातयेत् ॥ ७
वेदाहं हि महादेवं तत्त्वेन भरतर्षभ ।
यानि चास्य पुराणानि कर्माणि विविधानि च ॥ ८
आदिरेष हि भूतानां मध्यमन्तश्च भारत ।
विचेष्टते जगच्चेदं सर्वमस्यैव कर्मणा ॥ ९
एवं सिसृक्षुर्भूतानि ददर्श प्रथमं विभुः ।
पितामहोऽब्रवीच्चैनं भूतानि सृज माचिरम् ॥ १०
हरिकेशस्तथेत्युक्त्वा दीर्घदर्शी तदा प्रभुः ।
दीर्घकालं तपस्तेपे मग्नोऽम्भसि महातपाः ॥ ११
सुमहान्तं ततः कालं प्रतीक्ष्यैनं पितामहः ।
स्रष्टारं सर्वभूतानां ससर्ज मनसाऽपरम् ॥ १२
सोऽब्रवीद्भ्रातरं दृष्ट्वा गिरिशं सुप्तमम्भसि ।
यदि मे नाग्रजोऽस्त्यन्यस्ततः स्रक्ष्याम्यहं प्रजाः १३
तमब्रवीत्पिता नास्ति त्वदन्यः पुरुषोऽग्रजः ।
स्थाणुरेष जले मग्नो विस्रब्धः कुरु वै प्रजाः ॥ १४

मधुघातिनि मधुदैत्यहन्तरि ॥ २४ ॥ विवक्षतां वक्तुमिच्छतां वाच्याः निन्द्याः नैव स्म ॥ २८ ॥ षोडशोऽध्यायः ॥ १६ ॥

भूतान्यन्वसृजत्सप्त दक्षः क्षिप्रं प्रजापतिः ।
यैरिमं व्यकरोत्सर्वं भूतग्रामं चतुर्विधम् ॥ १५
ताः सृष्टमात्राः क्षुधिताः प्रजाः सर्वाः प्रजापतिम् ।
बिभक्षयिषवो राजन्सहसा प्राद्रवंस्तदा ॥ १६
स भक्ष्यमाणस्त्राणार्थी पितामहमुपाद्रवत् ।
आभ्यो मां भगवांस्त्रातु वृत्तिरासां विधीयताम् १७
ततस्ताभ्यो ददावन्नमोषधीः स्थावराणि च ।
जङ्गमानि च भूतानि दुर्बलानि बलीयसाम् ॥ १८
विहितान्नाः प्रजास्तास्तु जग्मुस्तुष्टा यथागतम् ।
ततो ववृधिरे राजन्प्रीतिमत्यः स्वयोनिषु ॥ १९
भूतग्रामे विवृद्धे तु सृष्टे देवासुरे तदा ।
उदतिष्ठज्जलाज्ज्येष्ठः प्रजाश्चेमा ददर्श सः ॥ २०
बहुरूपाः प्रजाः सृष्टा विवृद्धाश्च स्वतेजसा ।
चुक्रोध बलवद्दृष्ट्वा लिङ्गं स्वं चाप्यविध्यत ॥ २१
तत्प्रविद्धं तथा भूमौ तथैव प्रत्यतिष्ठत ।
तमुवाचाव्ययो ब्रह्मा वचोभिः शमयन्निव ॥ २२
किं कृतं सलिले शर्व चिरकालस्थितेन ते ।
किमर्थं चेदमुत्पाद्य लिङ्गं भूमौ प्रवेशितम् ॥ २३
सोऽब्रवीज्जातसंरम्भस्तथा लोकगुरुर्गुरुम् ।
प्रजाः सृष्टाः परेणेमाः किं करिष्याम्यनेन वै ॥ २४
तपसाऽधिगतं चान्नं प्रजार्थं मे पितामह ।
ओषध्यः परिवर्तेरन्यथैवं सततं प्रजाः ॥ २५
एवमुक्त्वा स सक्रोधो जगाम विमना भवः ।
गिरेर्मुञ्जवतः पादं तपस्तप्तुं महातपाः ॥ २६

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि ऐषीकपर्वणि सप्तदशोऽध्यायः ॥ १७ ॥

अष्टादशोऽध्यायः ॥ १८ ॥

कृष्णेन युधिष्ठिरंप्रति रुद्रस्य कोपप्रसादाभ्यां देवानां यज्ञनाशतत्प्रवृत्तिकथनपूर्वकं तत एवाश्वत्थामद्वारा पुत्रादिवधसंभवकथनम् ॥ १ ॥

श्रीभगवानुवाच ।
ततो देवयुगेऽतीते देवा वै समकल्पयन् ।
यज्ञवेदप्रमाणेन विधिवद्यष्टुमीप्सवः ॥ १
कल्पयामासुरथ ते साधनानि हवींषि च ।
भागार्हा देवताश्चैव यज्ञियं द्रव्यमेव च ॥ २
ता वै रुद्रमजानन्त्यो याथातथ्येन देवताः ।
नाकल्पयन्त देवस्य स्थाणोर्भागं नराधिप ॥ ३
सोऽकल्प्यमाने भागे तु कृत्तिवासा मखेऽमरैः ।
तपसा यज्ञमन्विच्छन्धनुरादौ ससर्ज ह ॥ ४
लोकयज्ञः क्रियायज्ञो गृहयज्ञः सनातनः ।
पञ्चभूतनृयज्ञश्च जज्ञे सर्वमिदं जगत् ॥ ५
लोकयज्ञैर्नृयज्ञैश्च कपर्दी विदधे धनुः ।
धनुः सृष्टमभूत्तस्य षष्टिकिष्कुप्रमाणतः ॥ ६
वषट्कारोऽभवज्ज्या तु धनुषस्तस्य भारत ।
यज्ञाङ्गानि च चत्वारि तस्य संनहनेऽभवन् ॥ ७
ततः क्रुद्धो महादेवस्तदुपादाय कार्मुकम् ।
आजगामाथ तत्रैव यत्र देवाः समीजिरे ॥ ८
तमात्तकार्मुकं दृष्ट्वा ब्रह्मचारिणमव्ययम् ।
विव्यथे पृथिवी देवी पर्वताश्च चकम्पिरे ॥ ९
न ववौ पवनश्चैव नाग्निर्जज्वाल वैधितः ।
व्यभ्रमच्चापि संविग्नं दिवि नक्षत्रमण्डलम् ॥ १०
न बभौ भास्करश्चापि सोमः श्रीमुक्तमण्डलः ।
तिमिरेणाकुलं सर्वमाकाशं चाभवद्वृतम् ॥ ११
अभिभूतास्ततो देवा विषयान्न प्रजज्ञिरे ।

लोकयज्ञो लोकेषणा सर्वो मां साधुमेव जानात्विति वासनारूपः । क्रियायज्ञः गर्भाधानादिसंस्काररूपः । गृहयज्ञः पत्नीसाध्याग्निहोत्रादिः । पञ्चभूतनृयज्ञः पञ्चभूतानां गुणैः शब्दादिभिर्या नृणां प्रीतिस्तद्रूपः । विषयजं सुखमित्यर्थः । एतैरेव चतुर्भिर्यज्ञैः सर्वं जगत्सृष्टम् ॥ ५ ॥ तत्र मध्यमयोः शास्त्रोक्तयोर्यज्ञयोर्नाशार्थं प्रथमचरमयज्ञाभ्यामीश्वरो धनुः कृतवान् । किष्कुर्हस्तः ॥ ६ ॥ अष्टादशोऽध्यायः ॥ १८ ॥

न प्रत्यभाच्च यज्ञः स देवतास्त्रेसिरे तथा ॥ १२
ततः स यज्ञं विव्याध रौद्रेण हृदि पत्रिणा ।
अपक्रान्तस्ततो यज्ञो मृगो भूत्वा सपावकः ॥ १३
स तु तेनैव रूपेण दिविस्थो वै व्यराजत ।
अन्वीयमानो रुद्रेण युधिष्ठिर नभस्तले ॥ १४
अपक्रान्ते ततो यज्ञे संज्ञा न प्रत्यभात्सुरान् ।
नष्टसंज्ञेषु देवेषु न प्राज्ञायत किंचन ॥ १५
त्र्यम्बकः सवितुर्बाहू भगस्य नयने तथा ।
पूष्णश्च दशनान्क्रुद्धो धनुष्कोट्या व्यशातयत् ॥ १६
प्राद्रवन्त ततो देवा यज्ञाङ्गानि च सर्वशः ।
केचित्तत्रैव घूर्णन्तो गतासव इवाभवन् ॥ १७
स तु विद्राव्य तत्सर्वं शितिकण्ठोऽवहस्य च ।
अवष्टभ्य धनुष्कोटिं रुरोध विबुधांस्ततः ॥ १८
ततो वागमरैरुक्ता ज्यां तस्य धनुषोऽच्छिनत् ।
अथ तत्सहसा राजंश्छिन्नज्यं विस्फुरद्धनुः ॥ १९
ततो विधनुषं देवा देवश्रेष्ठमुपागमन् ।
शरणं सह यज्ञेन प्रसादं चाकरोत्प्रभुः ॥ २०
ततः प्रसन्नो भगवान्प्रास्यत्कोपं जलाशये ।
स जलं पावको भूत्वा शोषयत्यनिशं प्रभो ॥ २१
भगस्य नयने चैव बाहू च सवितुस्तथा ।
प्रादात्पूष्णश्च दशनान्पुनर्यज्ञांश्च पाण्डव ॥ २२
ततः सुस्थमिदं सर्वं बभूव पुनरेव हि ।
सर्वाणि च हवींष्यस्य देवा भागमकल्पयन् ॥ २३
तस्मिन्क्रुद्धेऽभवत्सर्वमसुस्थं भुवनं प्रभो ।
प्रसन्ने च पुनः सुस्थं जगद्भवति भारत ॥ २४
ततस्ते निहताः सर्वे तव पुत्रा महारथाः ।
अन्ये च बहवः शूराः पाञ्चालस्य पदानुगाः ॥ २५
न तन्मनसि कर्तव्यं न च तद्द्रौणिना कृतम् ।
महादेवप्रसादः स कुरु कार्यमनन्तरम् ॥ २६

॥ इति श्रीमन्महाभारते शतसाहस्रिकायां संहितायां वैयासिक्यां सौप्तिकपर्वणि ऐषीकपर्वणि अष्टादशोऽध्यायः ॥ १८ ॥

समाप्तं ऐषीकपर्व ॥ २ ॥ सौप्तिकपर्व च समाप्तम् ॥ १० ॥

अस्यानन्तरं स्त्रीपर्व भविष्यति
तस्यायमाद्यः श्लोकः ।
जनमेजय उवाच ।
हते दुर्योधने चैव हते सैन्ये च सर्वशः ।
धृतराष्ट्रो महाराज श्रुत्वा किमकरोन्मुने ॥ १

इदं सौप्तिकपर्व कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण टी. आर्. व्यासाचार्येण च मुंबय्यां निर्णयसागरमुद्रायन्त्रे मुद्रापितम् । शकाब्दाः १८२९ सन १९०७.

(289)

AFTER THIS
PAGES ARE
BLANK.